कार्यविवेकानवधारणनिमित्तः प्रश्नः कल्पितः तथा ज्ञानोऽभिप्रेतं प्रश्नमंगीकृत्यापि प्रत्याचष्टे तथापि भगव
तो प्रश्नानुरूपं प्रतिवचनं देयं भगवतोऽभ्यासभावेन एकं ज्ञानं कर्म प्रधानं संभवादित्यर्थः प्रश्नानुरूपमेव प्रति
वचनस्य प्रकटयति यथा बुद्धिकर्मणोः समुच्चयपक्षः किमर्थमित्यत्र भ्रान्तोऽसीति व्याख्यानं प्रश्नमाद्यं पठति
ननु तत्र प्रतिवचनमननुरूपं प्रतिवचनस्य प्रश्नाननुरूपत्वमेव स्पष्टयति एषामन्यदेवाहेति ध्येयमयाग्रयमाशेते
ज्ञानवतामेव ज्ञानेन कर्मणा समुच्चयो ज्ञानस्यातिप्रसंगादिति प्रत्यक्षमानेऽपि प्रतिक्षिपति नापि स्वार्थेनैव कर्मणा बुद्धेः स
मुच्चयाभिप्रेतो विभागवचनादिति सर्वमनुपपन्नं स्यात् अतिप्रसंगेऽज्ञानकर्मणोर्विभागवचनेऽपि दर्शयन् पठति तृ
तीयापत्तं पक्षमाशङ्क्य प्रश्नो भगवत्प्रतिवचनं सर्वमिति दृष्टान्तेनैव स्वार्थेनापि कर्मणा बुद्धेः समुच्चये विकल्प्यादि
न्यपि द्वितीयपक्षासंभवे हेतुतरमाह किं च तत्त्वविषयं बुद्धेः स्वार्थेन स्वधर्मेऽतिज्ञानेनत्वेति कर्मणि क्षेत्ररूपोऽपि जय
स्यानुपालेऽभ्युपपन्नः समुच्चयपक्षे प्रश्नप्रतिवचनयोरसंभवात्तृष्णीतापत्तावुत्तरमित्युपसंहरति तस्मात्
गीताशास्त्रे ईषन्मात्रेणापि श्रौतेन स्मार्तेन वा कर्मणा ज्ञानस्य समुच्चयपक्षं केनचिद्दर्शयितुं शक्यः विशुद्ध
बुद्धात्मज्ञानस्य फलसिद्धेर्न सहकारिसापेक्षमज्ञानानिवृत्तिफलत्वाद् ज्ञानादिति तत्त्वज्ञानवत् यथा वा बध्यः स्वहा पान
पेक्षेण ज्ञानेन निवर्त्यते अज्ञानात्मकत्वात् रज्जुसर्पवदिति भावः ननु कर्मादिदृष्टान्तयासक्त्यास्त्रिकोऽपि लोके समुच्चयमि
तिवत्प्रमाणानाकर्ष्य गीताशास्त्रे समुच्चयप्रतिपादितमित्याह यस्य तु ज्ञानात्मज्ञानादिदोषेणाचारकर्मणि प्रवृत्तस्य पक्षेन
रागेन तत्प्रमावाविशुद्धसत्त्वस्य ज्ञानमुत्पन्नं चेदनात्मज्ञानानुसारेण विधिनानुष्ठेयस्य कर्मणो धर्मवाद्यापारमात्र
स्य तथातथाभावात्तदविरुद्धत्वं तत्प्रमाणमिमाः सम्यग्यामायिकारशक्तिप्रत्यभावाद्यागादेश्वरस्येनामविद्यालेशतो

१३

यात्मागतो नाम धर्मजिज्ञासोत्तरकाले लोकत्रयसाधने पुत्रे प्राकृतत्वमननदर्शितेनात्रतने सच ब्रह्मचारी सन् गुरुसमीपे प
यो विधिवद्वेदमधीत्यात्मज्ञानार्थं धर्मजिज्ञासां कृत्वा तदनन्तरकाले लोकत्रयप्राप्तिसाधने पुत्रादित्रये सोकामयत जायामे
स्यादित्यादिना कामितवानित्यर्थः। वित्तं विभजते द्विप्रकारं च वित्तं न देवप्रकारद्वैविध्यमाह मानुषं दैवं च।
तत्र मानुषं वित्तं व्याचष्टे कर्मरूपं तस्य फलपर्यवसायित्वमाह पितृलोकप्राप्तिसाधनं दैवं वित्तं विभजते विद्यारूपं दै
वं वित्तं तस्यापि फलनिष्ठत्वमाह देवलोकप्राप्तिसाधनं सोकामयतेति कर्मनिष्ठाने नोद्गाह। तस्मात् तेषामन्यमाह
य विद्याकाममननवत्कर्मोपिर्योगानादौ निदर्शितानीति ज्ञात्वसकामनाविशिष्टस्येव कर्माणि सोकामयतेत्यादि
ना दर्शितानीत्यर्थः। ज्ञाननिष्ठाविषयत्वेन दर्शितेषु तेष्वपि तात्पर्यं दर्शयति तस्याकुलस्यानुमानानमनवलोक
मितलोकामस्य विहिते कर्मण्यधिकारः स एव सन्यासपूर्विकाज्ञाननिष्ठां प्राग्दाह न तस्मात् दर्शितेत्यर्थः। एवमा
भेदेन ज्ञानकर्मणोभिन्नाधिकारिकत्वस्य श्रुत्यानुमतत्वे च भगवतो विभागवचनेनापास्तं समुच्चयपक्षं दर्शयन्तं ज्ञा १९
नमपबाधितमिति साधितं किंच समुच्चयो ज्ञानस्य श्रौतेन स्मार्तेन वा कर्मणा विवक्षितेपदि प्रश्नमसंगमाह तदेत
द्भगवद्वचनमनुपपन्नं स्याद्यदि श्रौतकर्मज्ञानयोः समुच्चयोभिप्रेतः स्यात् भगवतामनुच्चयोभिप्रेतः स्याद्यद्यपि
द्योतनरमाह नचार्जुनस्य प्रश्नः उपपन्नो ज्यायसी चेत्कर्मणस्ते इत्यादि। तामेवानुपपत्तिं प्रकटयति यदि बुद्धिकर्मणो
ह्यवाम्यमवेद्बुद्धिकर्मणोर्भगवतोपदेशः संमतः कथमर्जुनोऽधिक्षिपति यदि समुच्चयः शास्त्रार्थो भगवतोभिप्रेतो न तु
तुज्ञानकर्मणोरेकेन पुरुषेणानुष्ठेयत्वमेव तेनोक्तमर्जुनेन च श्रुतं तेनतद्विपरीतं संभवत्यनुक्तमश्रुतं च मिथ्यावक्त्र
ता भगवत्यारोपयेच्च तत्त्वोपाहृतेति किमिति मा कर्मण्येव नियुङ्क्षे पृष्टवान् तं ज्ञाननिष्ठां ज्यायसी तिभ्रांत्वक्तस्तेन यथा
त एष आलोचनया प्रश्नो नोपपन्नो व्यक्तः शास्त्रार्थेन यथा समुच्चयोभिप्रेतो न भवतीति ज्ञातिमानित्यर्थः। किं च समुच्चयपक्षे
ज्ञानकर्मणोर्यद्बुद्धेर्ज्यायस्त्वं भगवता एवं मतं अर्जुनेन चाश्रुतं कथमेषा न स्यात्तदारोपयितुमर्हति न तस्माद्बुद्धा
द्वचनेऽधिकत्वोचितमित्याह बुद्धेश्च कर्मणो ज्यायस्त्वं भगवत्प्रयुक्तमिदमर्जुनेन ज्यायसी चेत् कर्मणस्ते मतेनतास्तु
द्धितिति इतश्च समुच्चयः शास्त्रार्थो न भवत्यन्यथाप्येवमादावर्जुनस्य प्रश्नस्यानुपपन्नेरित्याह किं च न तत्र समुच्चये
सुद्धेऽपि समुच्चयेनार्जुनेनप्रश्नोपपत्तिरितिन दोषप्रश्नानुपपत्तिरित्याशंक्याह यदि बुद्धिकर्मणोः सर्वेषामनुष्ठेयकर्मकत्वं स्या

गी॰ भा॰ टी॰ १६

कारयतीति ननु च विभज्य विज्ञेयं ज्ञानकर्मणोः समुच्चितयोरेव मोक्षसिद्धिहेतुत्वे तत्पक्षेऽर्जुनो विभज्यार्थं ज्ञानमितिश्रुति
न कथं न च किं जनकादयस्तत्त्वविदोऽपि प्रवृत्तकर्माणः सुग्राह्याः स्थितिरन्यत्र तत्त्वविदः शोभनविकल्पं प्रथमपक्षमाह यदि ताव
त्सर्वे जनकादयस्तत्त्वविदोऽपि प्रवृत्तकर्माणः स्युः तर्हि ते तत्कथं प्रवृत्तकर्माण इत्येवं कर्मणामुक्तिं चित्तशुद्ध्यादिस्तस्याशङ्क्याह
ते लोकसंग्रहार्थं तेषां ज्ञानप्रयोजनार्थमपि च प्रवृत्तिर्युक्ता सर्वेषां दासीनत्वादित्याशङ्क्याह गुणा गुणेषु वर्तन्त
इति ईदृशा यागादिविषयेषु प्रवृत्तिद्वारा तत्त्वविदा तेषु प्रवृत्तकर्माणोऽपि ज्ञानेनैव तेषां सिद्धिरित्याह ज्ञानेन संसिद्धिमा
स्थिताः। उक्तमेवार्थं संसिद्धिमित्यादि दर्शयति कर्मसंन्यासमप्राप्यैव कर्मणा सहैव संसिद्धिमास्थिताः। न कर्मसं
न्यासं कृत्वेत्यर्थः। कर्मणोऽन्योऽन्याभिन्नामपि प्रवृत्त्या प्रवृत्तस्य भावोऽभिगृहीतेन सिद्धिं योगमनुवदति प्रथमनेन तत्त्ववित्
न च वाक्यार्थं कथयति ईश्वरसमर्पितेन कर्मणा साधनस्थेन संसिद्धिं सत्त्वशुद्धिं ज्ञानोत्पत्तिलक्षणां वा संसि
द्धिमास्थिता जनकादयः। विभज्य विज्ञेयमेव वाक्यार्थमित्येतदुपसंहरति इति व्याख्याय कर्मणश्चित्तशुद्धिद्वारा
ज्ञानहेतुत्वमित्युक्तेऽर्थे वाक्यशेषं प्रमाणयति एतमेवार्थं वक्ष्यति भगवान् योगिनः कर्म कुर्वन्तीत्यादिवाक्यम
थितो वदति स्वधर्मस्थो कर्म कुर्वन्ति स्वकर्मणेत्यादौ साक्षात् ब्रह्मेति नहि केवलं कर्मणा वक्ष्यतीत्याशङ्क्याह स्वक
र्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः। इत्युक्ता सिद्धिप्राप्तस्य ज्ञाननिष्ठां वक्ष्यति सिद्धिं प्राप्तो यथा ब्रह्मेत्यादि
ना स्वकर्मानुष्ठानादीश्वरप्रसादद्वारा ज्ञाननिष्ठायोग्यता लभ्यते न तु ज्ञाननिष्ठया मुक्तिस्तेन न साक्षात्क
र्मणो मुक्तिहेतुत्वमभिप्रेतमित्यर्थः। न च ज्ञानोत्तरकाले कर्माणि भवेयुरित्युपसंहरति तस्माज्ज्ञानात् केव
लादेव न तु ज्ञानकर्मभ्यां समुच्चिताभ्यां मुक्तिरिति निश्चितार्थः। ननु यद्यपि गीतासु तत्त्वज्ञानप्रधानमेव
वाक्यं तथापि तन्मध्ये श्रूयमाणं कर्म तद्गतं गीतार्थत्वप्रकरणप्रामाण्यादिति समुच्चयसिद्धिरित्याशङ्क्याह यथा चाय
मर्थस्तथा प्रकरणशो विभज्य तत्र तत्र दर्शयिष्यामः। अर्थद्वयप्रदर्शनेनात्मज्ञानमेव केवलं कैवल्यहेतुरिति गम्यते
इति प्रकृतामभिप्रायं प्रदर्श्याक्षेपसमाधिभ्यां पृच्छ्यार्थः समर्थितः सम्प्रति प्रश्नोत्तरत्वेनास्मात्प्रस्तावात् न यच्छ्रेयः १६
स्यात्तद् ब्रूहि नातः परं प्रश्नमनुयोगेन त्याज्यमित्यादेः स्वधर्ममपि चावेक्ष्येत्येतदन्तस्य समुदायस्य तात्पर्यमाह तत्र धर्म
सम्मूढचेतसो महति शोकसागरे निमग्नस्यार्जुनस्यान्यत्रात्मज्ञानादुद्धरणमपश्यन् भगवान् वासुदेवः ततोऽर्जुन

ज्ञायमानानां कर्माभासत्वात् केषांचिद्धानित्यादिवाक्येन समुच्चयज्ञापकमिति भावः वाक्यद्वयार्थे हि नोपपन्नविविदि
षावाक्यस्य साधनान्तरसंग्रहार्थः सांसारिकज्ञानं व्यावर्तयति यस्माद्यन्ततो विष्णुपतद्देवाभिनयति एकमेवेद
सर्वं ब्रह्मलोकेऽतश्चेति न स्यात् कर्मणि कर्म प्राजने चेति तत्रापि लोकसंग्रहार्थं यतः एवं यथा प्रवृत्तस्यैव प्रवृत्तस्य
कर्मोपपत्त्यत्वप्रवृत्तिरूपं पदस्य पतनेन तत्कर्म येन तु हेः समुच्चयः स्यात् प्रवृत्तिरूपमिति रूपग्रहणमाभासत्वप्रदर्शना
र्थं कर्माभाससमुच्चयपरत्वपाहत्विकत्वाद्भ्रमादेतफलपतीतिशेषः किं च ज्ञानिनो यागादिप्रवृत्तिर्न ज्ञानेन फले
समुच्चीयते फलाभिसंधिविकलप्रवृत्तिमाद्दहंकारविधुरप्रवृत्तिरूपात्ज्ञाभगवदुक्तप्रवृत्तिर्विदित्याह यथा भगव
तो वासुदेवस्यात्मत्रयधर्मेवोहिनेन ज्ञानेन समुच्चीयते पुरुषार्थसिद्धयतद्वत् फलाभिसंध्यहंकाराभावस्यात्मत्व
वादिरूपः हेतुद्वयस्यासिद्धिमाशंक्य परिहरति नत्वविद्धिनाहंकारमोत्रिभयत्वेनेचतत्फलमभिसंधत्ते
रूपद्वयेवाहमितिमत्वा नो विद्वान् प्रवृत्तिमत्फलेवानेवमङ्गतत्वेनपस्यतिरूपादिवत्हपयहत्पइहधर्मता
दमात्तत्कार्यकरणसंघातगततेनैवप्रवृत्त्यादिप्रतिपद्यते तत्स्वतत्त्वविदो मात्योनभिमतात्मनात् तावदहंका
रस्यात्मत्वादिफलाभिसंध्योराभासत्वात्तासिद्धहेतुद्वयमित्यर्थः ननु ज्ञानोदयात्प्रागज्ञस्याभिवोन्तर
कालेऽपि प्रतिनियतप्रवृत्त्योदर्शनात्तत्रहर्षोनिष्प्रवृत्त्यादेराभासत्वमिति तत्राह यथा च स्वर्गादिकामा
र्थिनो अग्निहोत्रादिकाम्यसाधनानुष्ठानायाहिताग्नेः कामोपवायग्निहोत्रादौ प्रवृत्तस्य सामिके तो कस्मिंश्चित्का
मस्तेवाग्निहोत्राद्यनुतिष्ठतोऽपि न तत्काम्यमग्निहोत्रादि भवति तथा स्वर्गादेरेव काम्यमानत्वात्कामस्तु
तिनः स्वर्गादिकामस्याग्निहोत्रादेरपि नित्यस्वर्गादिसाधनस्यानुष्ठानार्थमग्नीनाधाय प्रवर्तितस्यान्तरस्मि
नेव काम्यकर्मणि प्रवृत्तस्यार्द्धकृते केनापि हेतुना कामे विनष्टे तदेवाग्निहोत्रादिनिर्वर्तयतो न तत्काम्यं भवति
नित्यकाम्यविभागस्य स्वाभाविकत्वाभावात्कामोपबंधानुपबंधकृत तत्रापि यथा विद्वत्प्रवृत्तिर्विभागे कारणाभावा
द्यागादिप्रवृत्तेर्ज्ञानां कर्माभासत्वमित्यर्थः विद्वत्प्रवृत्तीनां कर्माभासत्वमित्यत्र भगवदनुमतिमुपन्यस्यति तथा दर्शि
यति च भगवान् कुर्वन्नपि न करोति न लिप्यत इति तत्र ननु विद्वत्प्रवृत्ते रूपिकर्माभासत्वे प्रागदर्शनात्तत्प्राण
रूपकर्माभासत्वानुपपत्तेः समुच्चयसिद्धिरिति तत्राह यच्च पूर्वैः पूर्वतरैः कृतं कर्म नैव हि संसिद्धिमास्थिता जन

15

उत्सन्नकुलधर्माणामित्यादीनि वचनानि किमेतावता फलितमिति तदाह तदेतन्मौढ्यं पाण्डित्यं च विरुद्धमात्मनि द-
र्शयसुन्मत्त इवेत्यभिप्रायः तस्मात्त्वमशोच्यमनुशोचन्नहृषितवन्तस्यां पाण्डित्यं बुद्धिमतां वचनं भाषितवानसीति यावत् अ-
र्जुनस्य शोको भ्रान्तिनिमित्तमात्माज्ञानमित्याह यस्माद्गतासून् गतप्राणान्मृतानगतासूंश्चागतप्राणान् जीवत-
श्च नानुशोचन्ति पण्डिताः आत्मज्ञाः पण्डा आत्मविषया बुद्धिर्येषां न तु स्वल्पबुद्धिमात्रमेव पाण्डित्यं न तावदात्मज्ञत्वे हेतुमा-
त्वादित्याशंक्याह ते हि पण्डिताः पाण्डित्यं पण्डितभावमात्मज्ञानं निर्विद्य निश्चयेन लब्ध्वा बाल्येन तिष्ठासेदिति श्रुतेः हृदा
रणमेवकश्रुतिमुक्तार्थमुदाहरति पाण्डित्यं निर्विद्येति श्रुतेः यथोक्तपाण्डित्यमगृहीत्वैकपदमनावगतमित्याशंक्य
कार्यदर्शनादित्याह परमार्थतस्तु ते नित्यास्तानभ्यनुशोचन्ति यस्मादित्यस्यापेक्षितं दर्शयति अतस्तान्शो-
चोऽसीति नतु नित्यत्वमशोच्यत्वे कारणमित्युक्तं तद्विवेचयितुं पृच्छति कुतस्ते अशोच्या यतो नित्याः
नित्यत्वमसिद्धं प्रमाणाभावादिति चोदयति कथमात्मनामजातत्वमभावप्रसङ्गात् शशविषाणवदिति परिहरति
न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः किं चात्मानित्यत्वाभावेऽस्य जन्यत्वात् घटादिवदित्यनुमानान्तर-
माह न चैव न भविष्यामः सर्वे वयमतः परम् १२ यत्केनचिदात्मयाथात्म्यं जिज्ञासितं भगवानुपदिशति तेन नित्यादि
नाशोकथनमप्येतस्यादिश्चतदसंक्षिप्तवचनेऽभावात्सर्वेषां वा आत्मयाथात्म्यप्रतिपादनाविशेषादित्या-
शयेन पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजनेति तत्त्वमपि व्याख्यानाङ्गं प्रतिपादयति ननु एवं जातु कदाचिद्देहेना-
शे किं तामसमेव न त्वात्मनो देहोत्पत्तिविनाशयोरुत्पत्तिविनाशप्रसिद्धेरुक्तमनुमानं दृष्टप्रसिद्धिविरुद्धं तथा काला-
न्तरापरीक्ष्यमिति नेत्याह अतीतेषु देहोत्पत्तिविनाशेषु नित्य एवाहमासमित्यभिप्रायः चराचरव्यापाश्रयस्त्वमा-
दितित्यापेनात्मनो जननविनाशप्रसिद्धेरौपाधिकजन्मविनाशविषयत्वाद्विरुपाधिकस्य तस्य जन्मादिराहित्य-
मितिभावः यद्यपि तवश्चरस्य जन्मादिराहित्यं तथापि कथमेषामित्याशंक्याह तथा न त्वं नासीः किं त्वासीरेव तथापि
मे क्षमादीनां कथं जन्माभावस्तत्राह तथा नेमे जनाधिपाः नासन् किं त्वासन्नेव द्वितीयमनुमानं प्रयुक्तं पञ्चन्नरा ५
दुद्भावघेष्टे तथा न च न भविष्यामः किं तु भविष्याम एव च सर्वे वयमतोऽस्मात् देहविनाशात् परमुत्तरकालेऽपि न तु
देहोत्पत्तिविनाशयोरात्मनो जन्मविनाशभावे महासर्गमहाप्रलययोरात्मास्थितिविस्रष्टुं हिंगहृष्टान्तमुक्त्वा तस्मा

सुहृद्धारपितृपुत्रादिज्ञानाभावतारणायाह अशोच्यानित्यादिना अत्र हि शास्त्रे श्रीगीताख्ये प्रथमषट्कप्रासंगिका कात्ना
मुधा माना षट्, त्रित पदपदार्थे विधानं तत्र एवं षट्कात्मके एवंकाण्डे तत् पदार्थं विषयी करोति मध्यमषट्के त्वंपदम
मकाण्डे तत्पदार्थं योगे चरमनिरूपितमषट्कं तत्त्वमसि इति महावाक्यपदार्थं प्रकाशयति अत एव योगेन सा
धनानि तत्र प्रसंगात् पञ्चमे ज्ञानस्य तदधीनत्वान्तत्त्वज्ञानमेव केवलं केवल्यसाधनमिति च सर्वत्रोक्त
मिति एवं एवं तत् रीत्या शास्त्रार्थे परिनिश्चिते सति यावत् धर्मसंमूढचेतसो व्याकुलस्य विवेकविकलचेत
सस्तस्य मिथ्याज्ञानवतो हि कार्यमकार्यं चेत्; शोकादिसागरे तस्य विषये विषयेणात्मानं कालत
त्त्वं वाक्यार्थसाधनं तदितरेके ज्ञात्वा तत्र सिद्धं त्वमसि तत्र मतिर्भिन्नगत्यर्थे काद्येऽस्मिन् भगवान्
तं ज्ञानार्थं तमवेतार्थे पदार्थपरिशोधनेन तत्त्वं पदार्थं परिशोधनपूर्वकं सम्यग्ज्ञाने वाक्या
र्थे नियोजना यस्मात्ज्ञानेनस्यास्ति मोक्षः पदपदार्थपरिशोधनपूर्वके सम्यग्ज्ञाने वाक्यार्थे निष्ठा
नाधिकारिणमभिप्रेत्याह अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे गतासूनगतासूंश्च नानुशोचन्ति पण्डि
ताः ॥ ११ ॥ ननु केचित् ज्ञानानां वाक्ये कृष्णा इत्यात्मयाथात्म्यदर्शनं विधिवाक्यार्थमनेन शोकेन व्या
हरिष्यति तत्र कर्त्ता भवितुमर्हति कार्यं समवेतमिति साधनतापि परमिति यागस्येव
विधौ विधेयत्वेन प्रमाणमस्ति हि एवं विधिवाक्यार्थे कार्यविशिष्टे विधिपदे एव
व्याप्तिः शोकस्य प्रवृत्त्यादिकं विधिमधिकरोति तथाभिप्रेत्य व्याचष्टे नत्वेवाहं अशोच्यानभी
कथितेषामुपपत्तिः भीष्मादिषु वाच्याना वाक्येनात्मतत्त्वं वेति
सहस्रनाह एभीष्मादिषु वाच्यानेन इति तदीरितार्थविधिवाक्यानां अशोच्यानामनुवाद
यत्राह परमार्थरूपेण अशोच्यानां अर्जुनेन बुद्धिवर्णनादृश्यानां सावृत्तानां
व्याख्यानेन तानुशोचनं प्रकारमभिनयन् आत्मविद्याकरणानि तत्र नेति महतो वि
नाशनः किं कवित्यादि अत्र भार्यादिषु प्राप्तेष्वनुशोचनं
बन्धः विरुद्धार्थाभिधायित्वेन अर्जुनस्य साधयति तेषां बुद्धिमत्तां वादाश्च वचनानि च भाषसे

गी॰
मू॰
टी॰
१८

करणव्युत्पत्त्या नसेंद्रियविषयान्दर्शयति मात्राआभिर्मीयंते शब्दादय इति श्रोत्रादीनींद्रियाणि षष्ठीसमासे
दर्शयन्नाव्युत्पत्त्या स्पर्शशब्दार्थमाह मात्राणां स्पर्शाः शब्दादिभिः संयोगाः तेषामर्थक्रियामादर्शयति
तेषां शीतोष्णसुखदुःखदाः शीतं सुखं क्वचिद्दुःखं क्वचिच्च प्रयच्छंतीति संयोगेनचेंद्रियस्य कर्मव्युत्पत्त्या शब्दादिविषयपर
त्वमुपेत्य समासांतरेणार्थं विषयाणां कार्यकथयति अथवा स्पृश्यंत इति स्पर्शाः शब्दादयो विषया मीयंत
इति मात्राः मात्रास्तु स्पर्शाश्च शीतोष्णसुखदुःखदाः ननु शीतोष्णस्पर्शस्य सुखदुःखदत्वसिद्धत्वात् किमिति शी
तोष्णयोः सुखदुःखाभ्यां पृथग्ग्रहणमिति तत्राह शीतं च कदाचित्सुखं कदाचिद्दुःखं तथोष्णमप्यनियतरूप
त्वेन सुखदुःखे हेतुनेति पृथक् तयोर्ग्रहणं सुखदुःखे तु न तथेति पृथक्कथनं विषयस्पर्शास्तु पृथक्कथनं तत
एव सुखदुःखहेतवः ते हि आगमापायिनः तत्सुखदुःखयोः पृथक्कथनं सुखदुःखयोर्हेतोरेव स्मरणं दुःखस्य कं
हेतुं तत्र संयोगजानां सुखदुःखादीनां विषयाणां च दर्शयति न तु विषयेंद्रियसंयोगस्यानित्यत्वात् ते सहस्व तानि तथापि
त्यागानामनित्यत्वाद्धर्षविषादौ न युक्तौ तितिक्षस्वेत्याह यस्मात्ते मात्रास्पर्शास्त्वनित्या आगमाप
मापायिनः आगमापायित्वादनित्यास्तस्मात्तान्नित्यान्विलयरूपानात्यंतस्मान्तीन्सादीन् तितिक्षस्व सहस्व
तेषु हर्षविषादौ मा कार्षीरित्यर्थः अत्र केचिदेवमाहुः तितिक्षासाधनाभ्यासमपेक्ष्य सुखदुःखे विविदिषाधिका
रिविशेषणं तत्र कार्या श्रुतिका हि विशेषणमिति तेनापवृक्तं केवलसहनमनर्थहेतुरिति केचित्ते तथा
तितिक्षास्तीन्सहते किमर्थमिति विवेकवैराग्यादिसहितेन तत्साधनहेतुज्ञानद्वारा तदर्थमिति परिहरंति श्रुत्या ति
तितिक्षमाणस्य विवादिनो लाभमुपलभयति यं हि न व्यथयंत्येते पुरुषं पुरुषर्षभ समदुःखसुखं धीरं सोऽमृतत्वाय क
ल्पते १५ पुरुषर्षभ समदुःखसुखं समदुःखे सुखे यस्य तं समदुःखसुखं सुखदुःखे हर्षविषादरहितं धीरं धीमंतं न व्यथयं
ति न चालयंति नित्यात्मदर्शनादेते यथोक्ताः शीतोष्णादयः विवेकाद्धर्षविषादरहितमित्यनेन साधनसंप
न्नत्वमुच्यते धीमंतमिति नित्यानित्यविवेकमाश्रित्य समेतं शमदमादिवैराग्यादिरूपं नित्यात्मदर्शनेन सम
ग्रज्ञानसाधनचतुष्टयवंतं समीपकारिणं सन्न्यासिनं पदार्थज्ञानवतः समाधानादिवाक्यार्थज्ञाने यो १८
ग्यतामाह स नित्यात्मदर्शननिष्ठो द्वंद्वसहिष्णुरमृतत्वाय मोक्षभावाय कल्पते समर्थो भवतीत्यर्थः कस्मात्ते समर्थाभ

नाविनाशनवेष्टव्याक्षित्याणंकृतात्मानः नेतिति न्यायेन परिहरति त्रिष्वपि कालेषु नित्या आत्मस्वरूपेणेत्यर्थः । याव
द्विकारं तु विभागो लोकवदिति न्यायेन भिन्नत्वाद्विकारित्वमात्मनोऽनुमीयते भिन्नत्वं च बहुवचनप्रयोगभ्रमितमित्या
शंक्याह देहभेदानुवृत्त्या बहुवचनं नात्मभेदाभिप्रायेण नत्वेवं देहविहायैवं देहमुपाददानस्य विक्रियाव
तो नोत्पत्तिविनाशवत्तो भ्रमः । समुद्रवोदिति शंकने नत्वकस्यापि वनित्यत्वात्मोति अशोच्यान प्रतिज्ञायां नित्य
त्वे हेतवः तेषामनित्यावस्था एवमस्याभेदे सत्यविदस्ततो विक्रियाभावादात्मनो नित्यत्वमुपपन्नमित्युक्तं रश्लोकेन
दृष्टान्तावष्टम्भेन प्रतिपादयन्नाह दृष्टान्तमाह न केवलमागमादेवात्मनो नित्यत्वं किं तु वस्यान्तरवज्जन्मा
न एवं संस्कारानुवृत्तेरपि । देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा । तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति १३
देहिनो देहाभिमानिनो जीवस्य देहिनो देहवतस्तस्यास्मिन्वर्तमाने देहे यथा येन प्रकारेण कौमारं कुमार
भावो बाल्यावस्था यौवनं तारुण्यावस्था जरा वयोहानिर्जीर्णत्वावस्थेत्येतास्तिस्रोऽवस्थाः परस्परविल
क्षणास्तासां प्रथमावस्थानाशेन नाशो द्वितीयावस्थोत्पत्त्या नोत्पत्तिरात्मनः किं तर्हि विक्रियामेव द्वितीयतृ
तीयावस्थाप्राप्तिरात्मनो दृष्टा यथा तथैव देहान्तरप्राप्तिर्देहान्तरस्य प्राप्तिर्देहान्तरप्राप्तिरविक्रियस्यैवा
त्मन इत्यर्थः । धीरो धीमांस्तत्रैवं सति न मुह्यति न मोहमापद्यते देहवत्तेनास्मिन्नहं ममाभिमानमाह नाशमिति
विहाय [illegible] आत्मनः स्वस्त्वनुपपन्नाभिनित्यत्वज्ञानधीमान्नित्यत्वधीविवृत्तेः नत्वतो विक्रियाभावादि
त्येवमस्मिन्नुक्ते तत्त्वतोऽयमर्थः । आत्मनः अस्यादेशमते नित्यत्वे तदुत्पत्तिविनाशप्रयुक्तशोकमोहाभावेऽपि प्रकारा
न्तरेण शोकमोहौ स्यातामिति शंकामनूद्याव्रत्यते न शोकमवतारयति यद्यप्यात्मनाशनिमित्तो मोहो न संभव
ति नित्यत्वमात्मनो विजानतस्तथापि शीतोष्णसुखदुःखप्राप्तिनिमित्तो मोहो लौकिको दृश्यते सुखवियोगनिमि
त्तो दुःखसंयोगनिमित्तश्च शोकः इत्येतदर्जुनस्य वचनमाशंक्याह यदि नाशयोन्नाभ्यां हृद्वङ्ः त्वयाऽप्राप्तौ नि
मित्तौ कृत्यपो मोहादि दृश्यते तस्यान्यथा एकाद्याह एवमात्मनः तमाश्रित्य लौकिक विषयाणां प्रमाणचाने
त्यत्वो विद्याधिकारी स्यान्न तु तितिक्षुः सम्माहितात्मस्वेतितु नित्यत्वं विशेषणमिहोपदिश्यते मात्रास्
पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः । आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत १४ व्याख्येयं पदद्वयमुपादाय

गी॰ भा॰ टी॰ १७

व्यभिचरति तस्मात् यद्ग्राह्ये स्त्रेष्वनुवृत्तं तत्परमार्थसद्घटपटादिष्वनुगतो रज्जादेरिदमंशः विमतं सत्वं व्यभिचा
रित्वात्सप्रतिपन्नवदित्यर्थः आवृत्तस्य कल्पितत्वे प्रमाणमाह यद्विषया बुद्धिर्व्यभिचरति तदसदिति यद्युक्तं नन्विथ्या
यथा सर्पधारादिविमतं मिथ्या व्यभिचारित्वात्सप्रतिपन्नवदित्यर्थः इत्यनुमानद्वयमुक्त्वा रज्जवादेः कल्पितत्वमसत
श्च कल्पितत्वे सिद्धं तत्सिद्धमिति भावः ननु नेदमनुमानद्वयमुपपद्यते सन्मात्रस्य नेत्रेण सद्घटादितो विभागाभावादनुमाना
दिकार्यं व्यवहाराणामुपपत्तेरित्याह सत्यमेवं भागानुद्धितं तेन युक्ते उक्ते विभागे बुद्धिद्वयाधीनेष्वपि तेषु सत्यमनुमानादिव्यव
हारो निर्वहति प्रातिभासिक विभागेन तत्रप्रयोगात् परमार्थसम्बन्धेन तेन केवलव्यतिरेकाभावादित्यर्थः उक्तं स
न्मात्रभागस्य बुद्धिद्वयाधीनत्वं बुद्धिविभागस्याप्यतत्त्वाभावान्नेत्याह सर्वत्रैव बुद्धीनां नैकरूप्यमेनेव्यवहारमप्रत्यक्षमि
त्यर्थः बुद्धिविभागस्यापि कल्पितत्वेऽपि बाध्यविभाग इति भावः तेन तेन भावबुद्धिद्वयमनुरूपयस्तदसद्विभागेन
न: सामान्यरूपतया विशेषाकारतया सामान्यविशेषोभयवस्तुनोऽवस्थानं तस्याः नानामेतिचेत्तत्राह सामानाधिकरण्ये
न द्वयोः सामानाधिकरण्यं बुद्ध्योरुपचर्यते इति सामानाधिकरण्यं बुद्ध्योः सद्रूपादिसामानाधिकरण्य
मेकवस्तुनिष्ठत्वं वस्तुभेदेन घटपटयोरिव तद्योगादित्यर्थः नीलमुत्पलमिति नैकधर्मिविषयतया सामानाधि
करण्यस्य तुच्छतात्र वस्त्वेकविषयत्वमिति चेत्तत्राह नीलोत्पलवदित्यादि स्वरूपेण नेति नहि सामान्य
विशेषयोर्भेदाभेदौ भेदवन्नत्वावाभेदाभेदावविकल्प्यौ सामानाधिकरण्यं नीलोत्पलयोरिव न गो
लोकेन व्याहतमनुभूतं कल्पितमित्येकं निश्चितमित्यर्थः सामान्यविशेषयोः उक्तन्यायमनुगुणत्वाद् द्रवतीति तत्र
ति एवं सर्वत्र तुल्यो हि तत्रापि विकल्पदोषादिति भावः सामानाधिकरण्यानुपपत्त्या हि वस्तुनोः सामान्यविशेषा
वितिपक्षे श्रीतत्वं विशेषावेव वस्त्विति पक्षे शीतादिपतनं घटादिबुद्धिर्व्यभिचरति बुद्धिव्यभिचाराद्वैय
व्यभिचारोऽपि कथं व्याहन्नानाविशेषाणामसत्त्वमित्याशङ्क्याह तथावदर्शने विकारो हि सत्यादावितिषे
धः नैवैकं वस्तु सामान्यविशेषात्मकं एकस्मिन्नुभयविरोधादित्यभिप्रेत्य सामान्यमेकमेव वस्तु तद्वयोर्व्यभिचारा ११
द्रौपस्यापि ममत्वं या तावदित्याह तत्र सद्बुद्धिः व्यभिचरतीति पूर्वेण संबंधः विशेषाणां व्यभिचारेण तत्स्याव्यभि
चारे सति तस्य व्यभिचारफलितं सत्यमुपसंहरति तस्माद्घटादिबुद्धिविषया सत्सु असत्कल्पितत्वेऽप्याद्यः पारमार्थमेवम्यक्तो

वति अधिकारिविशेषणेन तितिक्षुत्वे हेतुं नरपरत्वेनोक्तं श्लोकमवतारयति इतश्च शोकमोहावकृत्वा शीतोष्णादि
सहनं युक्तं यतः शास्त्रार्थमेवं सूचयति यस्मात् यतः शीतादेः शोकादिहेतोरनात्मनो नास्ति वस्तुत्वं वस्तुनश्चा
त्मनो नास्ति विकारत्वेनैकरूपत्वमेतावता निपुणतो विशेषणं तितिक्षुत्वं युक्तमित्याह नासतो विद्यते भावो नाभावो विद्य
ते सतः उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः १६ नासतोऽविद्यमानस्य शीतोष्णादेः कार्यस्य सत्त्वेऽपि
कारणसत्त्वेनाऽसत्तासत्त्वासिद्धिरित्याशंक्य विशिनष्टि सकारणस्य न विद्यते नास्ति भावो भवनमस्तिता ना
सतः स्वरूपादप्यनेकाकारानुकल्पितमन्यथा सतः शून्यस्याप्यस्तित्वप्रसंगाभावादसतः प्रतिबन्धमसक्ति
रित्याशंक्याह नहि शीतोष्णादि सकारणं प्रमाणैर्निरूप्यमाणं वस्तु संभवति विमतमसत्तात्विकं प्रमाणागम्य
कत्वाद्रज्जुसर्पवत् नहि प्रमेयग्राहकस्य सत्यत्वादेतस्तावेदनप्रामाण्यं प्रकल्प्यते विषयस्य दुर्निरूपत्वाद्
निर्वाच्यत्वमित्यर्थः कथं पुनर्घटादिविषयस्य शीतोष्णादेरुक्तं निरूपत्वेनानिर्वाच्यत्वं तत्राह विका
रो हि सः तत्र श्रुतिमतं मिथ्यात्वमागमापायित्वात्स्वप्रतिपन्नं वाचारम्भणमाह विकारस्य व्यभिचरति वाचा
रम्भणश्रुतेर्द्वैतमिथ्यात्वग्राहकत्वेऽप्यंशप्रतिचकारः किंच कार्यं कारणाद्भिन्नमभिन्नं वेति विकल्पाद्यदु
पपत्ति यथा घटादिः स्वानेकधा निरूप्यमाणं मृद्व्यतिरेकेणानुपलब्धेरसत्तथा सर्वो विकारः कारणव्य
तिरेकेणानुपलब्धेरसन् निरूप्यमाणमसत्त्वं हि द्वैतनिषेधः विमतं कारणान्न तत्त्वतो भिन्नं कार्यत्वाद् घटवदि
त्यर्थः इतोऽपि कारणाद्भेदेन नास्ति कार्यमाद्यावेतत्प्रमाणं विद्यमाने पितृत्वे इति व्याप्यादित्याह जन्मप्रध्वंसा
भ्यां प्रागूर्ध्वं चानुपलब्धेः यदि कार्यं कारणाद्भिन्नं तदा तस्याभेदेनासत्त्वे सत्त्वादिविरोधः नाद्यस्तेनावस्थान
नपुरः नतस्यापि कारणव्यतिरेकेणाभावात्कार्यकारणविभागविधुरं वस्तु निकार्यकारणपरम्परायावि
श्रमात् नभिप्रत्याह स्वादिकारणस्यापि तत्कारणव्यतिरेकेणानुपलब्धेरसत्त्वे कार्यकारणविभागविहि
नेवस्त्ववेनास्तीतिमन्वानेष्वाह यदि तदसत्त्वे सर्वाभावप्रसंग इति चेत् अत्र प्रत्याह न बुद्धिद्वयदर्शनात् द्वे हि
बुद्धी सन्तानोक्लिप्तत्वात् कल्पिते सर्वभेदविकल्पनाधिष्ठानमकार्यकारणं वस्त्वित्युपसंहरति न
सर्वत्र बुद्धिद्वयोपलब्धेः सद्बुद्धिरसद्बुद्धिरिति सद्बुद्धिरमतो वस्तुतो प्रमाणमनुमानं प्रत्यक्षस्याति यद्विषया बुद्धि

गी॰ भा॰ टी॰ १८ द्वैविध्ये न सममनीषिकयोर्भेदाभिन्नमिति चेन्मैवं किं सिद्धमद्वैतं प्रपञ्चस्य सम्यन्यते किं नश्यते किं वा सह द्वितत्वतो नाद्यः
अनभ्युपगमात् द्वितीयानभ्युपगमेऽपि न चैवं तस्य विरोधो भाष्यविरोधश्च सर्वं हि प्राग्वृत्तं तत्राप्यवहैतस्य सत्यत्वानधि
करणत्वसाधनेनाद्वैतसत्यत्वे पर्यवसितमिति मितिश्चेद्विरुद्धद्वैतत्त्वग्रन्निष्ठापितन्तयावधेनैपाशंकाः संग्रहात् परिव्या
भावादिति दूषणं अनात्मजातस्य कल्पितत्वेनावस्तुत्वप्रतिपादनपरतया प्रथमपादं व्याख्याय द्वितीयपादमात्म
नः सर्वकल्पनाधिष्ठानस्याकल्पितत्वेन वस्तुत्वप्रसाधनपरतया व्याकरोति तथा सत आत्मनो भावो विद्यमानता नावि
द्यते तस्यात्मनः सदात्मनो विशेषेषु विनाशित्वमुपपत्त्यास्य विनाशः स्यादित्याशंक्य विशिष्टनाशेऽपि स्वरूपनाशस्याप्र
18 सक्तेर्मैवमित्याह सर्वत्राव्यभिचारादिति बाधाभावः ननु कदाचित् सदेव पुनः सत्त्वमापद्यते प्रागसतोऽसत्स्य जन्मनासदा
भ्युपगमात् सदेव कदाचित् सत्त्वं प्रतिपद्यते स्थितिकाले सतोऽसत्त्वमुत्पत्तेर्नाशेनासत्त्वांगीकारादेव सदसतोरव्यवस्थितत्वावि
शेषादुभयोरपि हि पदमात्रेयच्चान्तत्वस्याविदित्याह एवमात्मानात्मनोः सदसतोरुभयोरपि दृष्टमुपलब्धोऽन्तो नि
र्णयः सत्सदेवासदसदेवेतित्यन्तु सुनेयायंथोक्तयो रुपारुह्य सहेनसंबध्यमानोऽहृशिमवधारयति नहि प्रागसतो
ऽसत्त्वं सत्त्वमसत्त्वे स्थितेन सत्त्वप्रागविरोधादसत्त्वनिवृत्तिश्च सत्त्वप्रागभावे प्रागभावमितरेतराश्रयपत्तमनतरेणैव सत्त्वापत्ते
ससत्वानिवृत्तावसत्त्वमनवकाशं भवेदेतेन सत्त्वासत्त्वापत्तिरपि प्रतिनीतेति भावः कथं तर्हि सतोऽसत्त्वमसतश्च सत्त्वं
प्रतिभातीत्याशंक्य तत्त्वदर्शिनामभावादित्याह तत्त्वदर्शिभिः तत्स्वभावतत्त्वेन तत्त्वदृष्टेन परामर्शयोग्यं किंचिद
लिंगकं तेप्रतिनियतमित्याशंक्य व्याचष्टे तदितिसर्वनामसर्वं च ब्रह्म तस्य नाम तदिति तद्भावस्तत्त्वं ब्रह्मणो यथा
त्म्य तद्दृष्टुं शीलं येषां तेन तत्त्वदर्शिनस्तैस्तत्त्वदर्शिभिः ननु सदसतोरन्यथात्वे कथं विप्रतिपद्यते केचित् तत्राह तेनि
यमतत्त्वे त्वनधात्वमेवाधिगच्छन्तीत्यत्र केषांमतमेषितव्यमितित्याह त्वमपीत्यत्र दर्शिनां दृष्टिमाश्रित्य शोकं मोह
चहित्वा शीतोष्णादीनि नियतानित्यभिप्रायः ननु सदिति सामान्यस्वरूपं वाग्व्यमेतस्य विशेषसापेक्षत्वं प्रातिल्यपदर्श
यन् सदेवाविशेषविनाशेऽपि नाशः स्यात्तत्राह नमिवाविशेषस्यास्तत्वादिपसतीतिवाच्यमात्मातिरिक्तानां विशेषाणां १८
कार्याणां कारणस्यरूपाणां व्यापावनवस्थानादात्मनस्तस्यसामान्यात्मनोऽप्रमितत्वाद्वक्ते दोषात् द्वितीयेतस्वरूपस
त्वाद्गताव कल्पितत्वाद्विनाशित्वमसत्त्वं तत्रैव सामान्यतया प्राग्युक्तदोषानुषक्तिरिति मत्वा तत्त्वादृष्टपति किं पुन

रयति व्यभिचाराज्ञानसद्बुद्धिविषयः सद्बुद्धिविषयस्य सतो कल्पितत्वे तत्कार्योपातमेव हेतुमाह व्यभिचारात्
सद्बुद्धिव्यभिचारात् ननु व्यभिचारित्वे हेतोरसिद्धिरिति शंकते घटे विनष्टेऽपि घटबुद्धेर्व्यभिचरत्याः सद्बुद्धिरपि व्यभिच
रतीति चेत् सद्बुद्धेर्घटबुद्धिवत् घटविषयत्वाभावान्न घटनाशे व्यभिचारोऽस्तीति परिहरति न पटादावपि सद्बुद्धि
दर्शनात् सद्बुद्धेः घटविषयत्वे निरालम्बनत्वापत्तेर्घटबुद्धिष्वपि तस्याश्च व्यभिचारित्वमाशंक्याह विशेषणविशेष्ये च सा सद्बुद्धिः
सतो कल्पितत्वहेतोरव्यभिचारित्वस्यासिद्धिं कथं त्यविशेषणकल्पितत्वहेतोर्व्यभिचारित्वस्यासिद्धिं कथं त्यविशे
षणकल्पितत्वहेतोर्व्यभिचारित्वस्यासिद्धिमाशंकते सद्बुद्धिवत् घटबुद्धिरपि घटान्तरे दृश्यत इति चेत् यथा सद्बुद्धि
र्घटे नष्टे पटादौ दृष्टत्वाद्व्यभिचारित्वेन व्यभिचारः सतो दर्शितः तथा घटबुद्धिरपि घटे नष्टे घटान्तरे दृष्टत्वाद्व्यभि
चाराद् घटे व्यभिचारासिद्धेर्विशेषणत्वेऽपि कल्पितत्वहेतोर्व्यभिचारो न सिध्यतीत्यर्थः घटबुद्धेर्घटान्तरे दृष्टत्वेऽपि प
टादावदृष्टत्वेन व्यभिचाराद् घटादिविशेषस्यापि व्यभिचारित्वसिद्धिरित्युत्तरमाह न पटादावदर्शनात् विशेषणस्या
व्यभिचारित्वे सत्यपि तदुपपत्तेरव्यभिचारित्वहेतोः सिद्धिनादवस्यमिति शंकते सद्बुद्धिरपि नष्टे घटे न दृश्यत इति चेत्
घटादिनाशदेशे न दृश्यत इत्याक्षेपेण सत्ताभानेऽपि नाशे तद्घटाद्यभावाधिष्ठानत्वेनाभानादित्याह न विशेष्याभावा
त् यथा सर्वगतजातेर्विषयत्वे सत्यपि तद्व्यञ्जकाभावाद्गोत्वाभावान्न यथा तत्रापि
घटादिनाशे व्यञ्जकाभावान्न भानं न स्वरूपाभावाद्दृष्टान्तमेव प्रपंचयति सद्बुद्धिविशेषणविषया सत्ता विशेष्या
भावे विशेषणानुपपत्तेः किं विषयाभावान्न तु अन्यः सद्बुद्धिविषयाभावात् इति योगिक विशेषणव्यभिचारादभे
सद्रूपाव्यभिचारादुक्तं सतः सत्यत्वमिति भावः इदं पाक्षिकेऽरेव विशेषणविशेष्यत्वदर्शनाद् घटेऽपि सतोऽपि विशेषण
विशेष्यत्वे तु यः सद्बुद्धेर्व्याकृताद्यकल्पितत्वानुमाने सामानाधिकरण्यबुद्धिबाधितमिति चोद्यमिति एकाधिक प
रणत्वे घटादेर्विशेष्यभावे न युक्तमिति चेत् अनुभवमनुसन्ध बाधितविषयत्वमनुमानस्येति न स
दितमरुस्थलमिति मरीचिकादावन्यतराभावेऽपि सामानाधिकरण्यदर्शनात् घटादेः कल्पितत्वानुमानस्य दोष
राहित्ये फलितमुपसंहरति तस्मादिति देहादेर्द्वयस्य कारणस्याकल्पितत्वे भवतीति अथ सपात्रव्याख्याने पौरस
माण्याविति शङ्कः नन्वनेन व्याख्याने भाष्यकारणाभिप्रेतं सर्वं हि तन्मूलत्वविवक्षायां भाष्यविरोधात् नापि युन

हिंसादिदोषसंभवेनेत्याह नासत इत्यर्धमारन्न १७ अंतवंतोऽनाविनाशो विद्यते येषां तेऽन्तवंतः ननु देहादिवत्सुखदुःखे
तुद्वेर्लक्ष्याः विच्छेदाभावात्कथं नित्यत्वं तेषामित्याशंक्याह यथा मृगतृष्णिकादौ सद्बुद्धिरनुवृत्ताप्रमाणनिरूपणे
नैविच्छिद्यते सत्यस्यानन्तरत्वमदेहाः नष्टे मदेहाः सद्बुद्धिमात्रोपि प्रमाणेनानिरूपणेऽप्यवसानेविच्छेदाद्यनवंतो
भवंतीतिशेषः देहत्वादिना वजात्यहेहादेरनवंतत्वे शैलप्रवदनुमानेऽनुपपाकांक्षमित्याह सत्प्रमायादेहादिवन्नानव
नः शरीरादेरनवंतत्वेपि प्रवाहरूपेणात्मनस्तत्संबंधस्यानंतत्वमाशंक्याह नित्यस्य शरीरिणः शरीरवतो नाशि
नाप्रमेयस्यात्मनोऽनवंतस्त्वमुक्ता विवेकिभिरित्यर्थः प्रवाहस्य प्रवाहिव्यतिरेकेणानिरूपणान्न तदात्मना देहाद्यभा
वे संबंधसिद्धिरित्यभिसंधायोक्तं विवेकिभिरिति पदद्वयस्यैकार्थत्वमाशंक्यानित्यस्येति नित्यस्यानाशिन इति न पुन
रुक्तिर्नित्यत्वस्य हि विधत्वाल्लोके नाशस्य च नित्यस्य हि विध्यासिध्यर्थं नाशद्वैविध्यं प्रतिज्ञानिप्रकटयति यथा देहो
भस्मीभूतोऽदर्शनं गतो नष्ट उच्यते विद्यमानोप्यन्यथापरिणतो व्याध्यादिप्राप्तो जातो नष्ट उच्यते नाशस्यानिर
वशेषत्वेन सावशेषत्वेन च सिद्धद्वैविध्ये फलितमाह नत्रनाशिनो नित्यस्येति द्विविधेनापि नाशेनासंबद्धस्येत्य
र्थः विशेषणद्वयं दृष्ट्वा नित्यस्यात्मनो विवक्षितमित्यर्थः अन्यतरविशेषणमात्रोपादाने परिणामिनित्य
त्वमात्मनः शंक्येतेत्यभिप्रायवानिमाह अन्यथाह्यप्रियत्वादिवन्नित्यत्वे स्यादात्मनस्त्वन्याम्रदीनोनित्यस्यानाशि
न इत्याह अप्रमेयस्य न प्रमेयस्य प्रत्यक्षादिप्रमाणैरपरिच्छेद्यस्येत्यनन्तरं शेषपदेन षट्विशेषणमाख्यायप्रमेय
त्वमाविपति नन्वागमेनात्मा परिच्छिद्यते इतस्त्वात्मनो नाप्रमेयत्वमित्याह अन्यत्वादिना च प्रवेतेन चागमप्रवृ
त्यपेक्षया पूर्वेव प्रत्यक्षादिनात्मैव परिच्छिद्यते तस्मिन्नेवाज्ञातत्वे संभवादज्ञातज्ञापकं प्रमाणमिति च प्रमाणलक्षण
दित्यर्थः एतदप्रमेयमित्यादिश्रुतिमनुसृत्य परिहरति नह्यात्मनः स्वतः सिद्धत्वात्कथमाननमनपेक्षात्मनः
सिद्धत्वमित्याशंक्योक्तं विशुद्धेनेति सिद्धेस्यात्मनि प्रमाणापरिप्रमितः प्रमाणान्वेषणं भवति प्रमितः प्रमेयमि
तिशेषः तदेव व्यतिरेकमुखेन विपादयति नहि एवमित्यसमहमित्यात्मानमप्रमाय पश्चात्प्रमेयपरिच्छेदाय प्र २५
वर्तते आत्मनः सर्वलोकप्रसिद्धत्वात्तस्मिन्प्रमाणमन्वेषणीयमित्याह नह्यात्मानामकस्यचिदप्रसिद्धो भ
वति अप्यहादेरनात्मविषयत्वान्न प्रज्ञाता ज्ञातज्ञानप्रमाणव्यवहारसंभवात्प्रमाणस्य व्यवहारिकत्वाद्विशेष

तन्नाशदेव सर्वदेति सामान्यदेवविशेषभावशून्यमविद्वैकरसंसदेवेत्यादिश्रुतिश्रमितेसर्वविक्रियारहितेवस्तुन्यक्रमतेस
द्भुवतितमित्युत्तरमाह उच्यते अविनाशितन्नीतिहि आत्मनः सदात्मनोविनाशराहित्यविज्ञानेसर्वजगद्व्यापकत्वं
हेतुमाह येनसर्वमिदंततं आत्मनोविनाशाभावेयुक्तिमाह विनाशमव्ययस्यास्यनकश्चित्कर्तुमर्हति १७ आत्मनोवि
नाशमिच्छताखेनावापरेणवाविनाशितव्यः आत्मनेनाशइत्याह अविनाशिनविनष्टुंशीलमस्येति देहादिद्वैतमसद्
श व्यतिरेकतः सतोविशेषणस्वनाशराहित्यतस्यप्रधानकोनिपातइत्याह नश्वाश्रीसतोविशेषणार्थस्तुहिशब्दोज्ञानो
हि आकाशवदेकविशेषादर्शयति किं येनसर्वमिदंजगत्ततंव्याप्तंसद्वात्वेनदेशस्यसाकाशमाकाशेनेव घटा
द्यः विमतमविनाशिव्यापकत्वादाकाशवदृष्टिश्रमितमेवादाहरणंकिंतत्प्रसिद्धमपीतिभावः नहितं यदित्याह
विनाशो नावतस्यविनाशंकर्तुंकश्चिदर्हतीतिसंबंधः विनाशस्यसर्वविधितनिर्विशेषत्वात्मापेहेत्वपमाध्रित
व्याकरोति अदर्शनमभावं नकश्चिदस्याभावंकर्तुंशक्नोतीत्यत्रहेतुमाह अव्ययस्यहिब्रह्महिस्वरूपेणव्येतिस्वसं
बंधिनावेतिविकल्पाद्यदूषयति नेतस्यावयवापहारेणनस्वरूपेणव्येतिव्यभिचरतीतिनिरवयवत्वात् नहिनिरवयवस्य
स्वावयवापचयरूपः स्वरूपव्ययः संभवतीत्यत्रवैधर्म्यदृष्टांतमाह देहादिवत् द्वितीयंनिरस्यति नाप्यात्मीयेना
त्मीयाभावात् नदेवदत्तरिकेदृष्टांतेनस्पष्टयति यथादेवदत्तोधनहान्याव्येतिनत्वेवंब्रह्मव्येति हितीयनिषेधेयो
गफलितमाह अतोव्ययस्याप्यस्यब्रह्मणोविनाशंनकश्चित्कर्तुमर्हतिकिंचब्रह्मपरतोनव्ययतिआत्मवाह्ययत्वदत्वा
ह नकश्चिदात्मानंविनाशयितुंशक्नोतीश्वरोपि आत्मवैहितस्येश्वरस्येतिश्रुतेः आत्माहिब्रह्मतादात्म्यश्रुतेरत्रहो
तिहेतुकियते अत्रनहिस्वयमेवब्रह्मस्वात्मनोनाशकःस्वदेहनादिदृष्टांतादित्याह स्वात्मनिचक्रियाविरोधात् सद
सतोरन्तरश्रुतयोः स्वरूपाव्यभिचारित्वेनपरमार्थतयासंदिग्धमिदानीमसंदिग्धार्थयितुमाह किंच
नन्वदसन् असदसद्वेतिनिर्धारितत्वान्मृगस्यनिरवकाशत्वमाशाकाशून्यव्याक्षेपं विवर्तितमसंदिग्धंदर्शयितुंतस्य
सावकाशत्वमाह यस्मात्सन्नाव्यभिचरतीतिदेहादेरनात्मवर्गस्यश्रुक्तिरजतकल्पविषयतेत्याह उच्यते अंतवंतइ
मेदेहाइत्येतत्प्रयुक्तस्यति नित्यस्योक्ताः आकाशवद्विद्यायातिशयार्थेविशेषणंहि शरीरिणः पवित्रमनित्यत्वमवादि
नेति अनाशिनोऽप्रमेयस्यतावदिविशेषणमाह अमेयस्यदेहादेरवस्तुत्वात्मनश्चैकत्वप्रयुक्तेस्यमेयस्थानस्यापित्ववेन

20

त्वामात्रस्थलत्वेनिराकर्तुमेवऋचौभगवानानीतवानितिशोकदुःखस्यसंसारगतिर्दर्शयति शोकमोहादिसं
सारकारणनिवृत्त्यर्थंगीताशास्त्रंनप्रवर्तकमित्येतस्यार्थस्यसाक्षिभूतेद्वेऋचावानिनायभगवान् तत्रप्र
थममन्त्रस्यसंगतिमाह यत्त्वमन्यसेयुद्धेभीष्मादयोमयाहन्यन्तेअहमेतेषांहन्तेत्येषाबुद्धिर्मृषैवतेअस्यते
निवृत्तनाटमृषात्वंबुद्धेर्दर्शयन्नप्रश्नमित्याशङ्क्याह कथमत्यन्तस्याज्ञानप्रसूतत्वेनत्रासमसत्वान्नकर्ता
बुद्धिनैषमतिपरिहरति यएनंवेत्तिहन्तारंयश्चैनंमन्यतेहतम् उभौतौनविजानीतोनायंहन्तिनहन्यते १९ ह
न्तारंचेन्मन्यतेहन्तुमित्याद्यामन्त्रमर्थतोदर्शयित्वाव्याचष्टे यएनंदेहिनंप्रकृतंवेत्तिविजानातिहन्तारंहनन
क्रियायाःकर्तारंयश्चैनमन्योमन्यतेहतंदेहहननेनहतोहमितिहननक्रियायाःकर्मभूतंतावुभौनवि
जानीतोनज्ञानवन्तौविवेकेनात्मानंहन्तारंहतंवात्मानंमन्यमानस्यकथमज्ञानमित्याशङ्क्याह ह
न्ताहंहतोहमितिदेहहननेनात्मानमहंप्रत्ययविषयंयौजानीतस्तावात्मस्वरूपानभिज्ञावित्यर्थः हन्त
त्वादिज्ञानमज्ञानमित्युक्तंहेतुमाह यस्मान्नायमात्माहन्तिनहननक्रियायाःकर्ताभवतिनचहन्यतेन
चकर्मभवतीत्यर्थः आत्मनोहननप्रतिकर्तृत्वकर्मत्वयोरभावेहेतुंदर्शयति अविक्रियत्वात् नत्वेवमा
द्यपितन्नजायतेम्रियतेवाविपश्चिदित्यादिमन्त्रान्तरमवतारयति कथमविक्रियआत्मेतिद्वितीयोमन्त्रः
सर्वविक्रियाराहित्यप्रदर्शनेनहन्तृविषयत्वमत्रमेवपठति नजायतेम्रियतेवाकदाचिन्जन्ममर
णविक्रियाद्वयप्रतिषेधस्साधयति नायंभूत्वाभविताबानभूयः अयमात्माभूत्वाभवनाभवितान
चाभूत्वाभूयोभवितेतियोजनाद्वयेकेवलक्रियाद्वयमेवात्रनिषिध्यतेकिन्तुसर्वमेवविक्रियाजातमित्या
ह अजोनित्यःशाश्वतोयंपुराणोनहन्यतेहन्यमानेशरीरे २० नजायतेनोत्पद्यतेवाच्यमर्थमुक्त्वा
विवक्षितमर्थमाह जनिलक्षणावस्तुविक्रियानात्मनोविद्यतइत्यर्थः नम्रियतेवाविकल्पार्थ 20
नवारयति वाशब्दश्चार्थेनिच्छन्नमर्थमितिदर्शयति नम्रियतेचेत्यन्त्याविनाशलक्षणाविक्रियाप्रतिषि
ध्यतेकदाचिच्छब्दः सर्वविक्रियाप्रतिषेधैःसम्बध्यतेसर्वदैवमाभिनयतिनकदाचिज्जायतेनकदा
चिन्म्रियतइत्येवं उत्तरविक्रियाभावेहेतुत्वेनतावन्मात्रप्रदर्शनाव्याचष्टे यस्मादयमात्माभूत्वाभवनोक्त

तत्स्वतस्त्वापि केवलेन दृष्टस्नेहेनैव घटयितुमात्मनि तत्प्रामाण्यं तथापि तद्धितं शङ्क्य न्या प्रामाण्यस्य तत्र प्रश्नस्मिन्स्वप्रत्ययभावनीया
शङ्कामाह प्रामाण्यमित्यप्रमाणं यस्तेषु णत्रस्यामसे तत्र ह्युक्तप्रतिपादिते प्रमाणादिविभागस्य व्याहतत्वात्पुरुषस्या
त्मनस्मृष्टिप्रत्ययेन मानितो धृत्वाच्छास्त्रागमस्य प्रामाण्यमित्यर्थः, तथापि कथमस्य प्रत्यगात्मनि प्रामाण्यं तस्य
तः सिद्धत्वेनाविषयत्वाद्ज्ञानस्यापत्त्वायोगादित्याशङ्क्य स्वतोभासमानस्याप्यशनीचोमनुष्याहं कर्ताहमित्या
दिनामतव्यत्वकर्तृत्वादीनामनर्थमागमध्यासेनात्मनि प्रतीयमानत्वात्तस्यात्रनिवर्तकत्वेनात्मनो
विषयत्वमनापाद्यैव शास्त्रस्य प्रामाण्यमुपपद्यते सिद्धे ननिवर्तकत्वादित्यभिप्रायेणाह अनर्थोऽध्यारोप
णमात्रनिवर्तकत्वेन प्रमाणमात्मनि प्रतिपद्यते. वेदान्तवाक्यानां दत्त्वेन ज्ञापकत्वेन किं मित्यात्मनि
पत्तस्य प्रामाण्यं नश्रमित्याशङ्कासुजेऽनाज्ञातार्थविशेषादिनेमताह नतत्तानार्थज्ञापकत्वेन प्रमा
त्मनो मानापेक्षामतरेण स्वतः सिद्धत्वेन प्रमाणमाह तथा च श्रुतिः - यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा
सान्तरः सर्वापेक्षामनेरेणापरोक्षादपरोक्षस्वरूपात्मक एव ब्रह्म न च नस्यात्मनो नार्थान्तरत्वे सर्वाभ्यन्तर
त्वेन सर्ववस्तुसारत्वान्नमात्मानं व्याचष्टे नित्याजना प्रथमपृष्ठे नावितनाभिव्यतिपाद्य फलितत्वेन
मयोति यस्मादेवं निस्पृहः किं पश्चात्मानस्माद्बुधः स्वस्वधर्मो निष्प्रयोजनत्वे निषेधेनात्मपदर्शयति पु
रुषार्थपरमाकांक्षीत्यर्थः - आत्मनो नित्यत्वात्स्वरूपमुपपाद्य पुरुषार्थत्वं विधानात्मानकर्मसमन्वयो
त्रभावित्याशङ्काह तत्र पुरुषार्थत्वं कर्मविधिपते पुरुषे नित्यवचनान्तकर्तव्यविधिरत्यन्ताशङ्काह
पुरुषशून्यवत्त्वाकाङ्क्षेन हि भीष्ममहमित्याद्युक्तेन स्य पुरुषापरसपरवचनमिति तत्राह यत्कमाह श्रुतिपु
रुषस्त्रीमानेन: यदि स्वतो पुरुषस्तुतिलहिं भगवद्वचनस्य का गतिरित्याशङ्काह तस्य कर्तव्यं प्रतिवेधा
यत्परमात्रं भगवतो किं यतो भगवद्वचनस्य प्रतिवधनिवर्तकत्वेनाप्यन्यत्वेन - स्वाभाविकत्वेन फलितमा
ह तस्मादिदमशेषनिष्प्रयुक्तत्वान्मात्रेणेति विधेः - अविनाशित्वनाहमित्यत्र एवाहंत्वेनात्मवत्तार्थसमर्थनश्रुत
ग्राहेऽनन्विरोधस्वरूपात्मपरिणामवादस्य वा निराकरणमात्मनि जन्मादिप्रतिभानस्यौपाधिकत्वप्रद
र्शनार्थमनन्तनत्यादि वचनमिति केचित् प्रस्तुतनामसमर्थनयोपाधि त्वोक्तस्य गीताशास्त्रार्थस्य उच्य

गी॰
भा॰
टी॰
२१

ष्यते न हन्तीत्यनुसर्गमाह न विपरिणमत इत्यर्थः । न जायत इत्यादिमंत्रार्थमुपसंहरति अस्मिन्मंत्रे षड्भावविकारा लौकिकवस्तुविक्रिया आत्मनि प्रतिषिध्यन्ते षड्भावविकाराणामात्मनि प्रतिषेधे फलितमाह सर्वप्रकारविक्रियारहित आत्मेति वाक्यार्थः । आत्मनः सर्वविक्रियारहितत्वेऽपि किमायातमित्याशंक्याह यस्मादेवमस्मादुभौ तौ न विजानीत इति पूर्वेण मंत्रेणास्य संबंधः । एवं श्लोकार्थस्यैवोत्तरश्लोकेऽपि प्रतिभानात्पौनरुक्त्यमाशंक्योक्तानुवादपूर्वकमुत्तरश्लोकमवतारयति य एनं वेत्ति हन्तारमित्यनेन मंत्रेण हननक्रियायाः कर्तृकर्मत्वं न भवतीति प्रतिज्ञाय न जायत इत्यनेनाविक्रियत्वे हेतुमुक्त्वा प्रतिज्ञातार्थमुपसंहरति केनेत्यादिभिः मानविरोधादुक्तेनेत्यर्थः । तस्मात्सर्वविक्रियासामर्थ्यान्नास्ति विदुषः कस्यापि विषयापरिच्छेद्याकार्थमप्यनुजानाति वेदाविनाशिनं नित्यं य एनमजमव्ययम् । कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥ २१ ॥ वेद विजानाति य इत्युपस्थापितं पूर्वमेव योजना कार्या परिहारे विद्वत्कारात्तरेण योजनमुत्तरमाह अविनाशिनमित्यभावविकाररहितं नित्यं विपरिणामरहितं यो वेदेति संबंधः । एनं पूर्वेण मंत्रेणोक्तलक्षणमजमव्ययमपक्षयरहितं कथं केन प्रकारेण स विद्वान्पुरुषोऽधिकृतो हन्ति हननक्रियां करोति कथं वा घातयति हन्तारं प्रयोजयति न कथंचिदित्यर्थः । कथं विद्वान् पुनरात्मन्यपि समभवतीति किमिति न जहातीति नन्वाक्षेपो नेत्याह उभयत्राक्षेप एवार्थः । कथं स पुरुषः स विद्वान्प्रतिवचनाद्दर्शितानामात्मनः संभवतीत्यर्थः । विवक्षितमेकरूपार्थं निगमयति हेतर्थस्याविक्रियत्वस्य तुल्यत्वाद्विदुषः सर्वकर्मप्रतिषेध एवं प्रकरणार्थोऽभिप्रेतो भगवतः । अविक्रियत्वहेतोरर्थस्याविदुषः सर्वकर्मनिषेधे समानत्वादित्यावत् । यदि विदुषः सर्वकर्मनिषेधोऽभिमतस्तर्हि किमिति हन्त्यर्थ एवात्मन्युक्तेन ग्राह हन्तेस्त्वात्मोपदेशार्थत्वेन विदुषः उक्तो हेतुमात्रेणाप्युक्तार्थत्वात् विदुषः केषु कर्मसु संभवे हेतुविशेषमपश्यन्कर्माण्याक्षिपति भगवान्कथं स पुरुष इति अभिप्रायमभिव्यनक्ति पृच्छ्यमानो हि तत्र विदुषः सर्वकर्मसामर्थ्यवत्तं पृच्छाविरोधात्मनो विक्रियत्वेन कर्मासंभवकारणविशेषः । उक्तमेवाभिव्यनक्ति तत्राविक्रियत्वमेव कारणविशेषः विदुषोऽविक्रियात्मनोऽवस्थानं यत्र तस्य विद्वत्त्वस्य धर्मत्वेन न स्वहन्तेति हि न वाच्यं यतः विदुषः सर्वकर्मत्यागे नास्ति कारणविशेषः । ११

स्यादित्याह अ न्यतो हि विदुषो विक्रियाया अनन्वयाद्वा इति अविक्रियात्वविशेषो विदुषः । तथापि हृदये तस्मादविक्रियत्वाद

यामनुभूय पश्चाद्भविताऽभावं गन्ता न भूयः । पुनस्तस्मान्न म्रियते उक्तमेव व्यनक्ति यो हि भूत्वा न भविता स
म्रियत इत्युच्यते लोके आत्मनि तु भूत्वा पुनरभवनाभावाद्वाशब्दात्किमस्तु तिरर्थः । आत्मनो जन्माभावेऽपि हेतुरि
हैव विवक्षित इत्याह वाशब्दाद्ब्राह्मणब्राह्मणसमासात् अभूत्वा भविता देहवदभूयः । पुनस्तस्मान्न जायते अभूत्वेति
हेतुः देहवदिति व्यतिरेकोदाहरणं उक्तमेवार्थं साधयति यो ह्यभूत्वा भविता स जायत इत्युच्यते नैवमात्मा
ऽतो न जायते जन्माभावेन तस्य विकारान्तरं विक्रियापि नात्मनोऽस्तीत्याह यस्मादेवं तस्मादजो यस्मान्न म्रिय
ते प्राणवियोगरूपात्मनो मरणस्याभावे सावशेषनाशस्याभाववन्निरवशेषनाशस्याभावोऽपि सिद्ध इत्याह तस्मा
न्नित्यश्च ननु जन्मविनाशयोर्निषेधेन तदन्तर्गतानां विक्रियान्तराणामपि निषेधसिद्धेः तद्विशेषणार्थं न पृथ
क् प्रयतितव्यमिति तत्राह यद्यप्याद्यन्तयोर्विक्रिययोः प्रतिषेधे सर्वा विक्रिया प्रतिषिद्धा भवति तथा
पि मध्यभाविनीनां विक्रियाणां स्वशब्दैरेव प्रतिषेधः कर्तव्य इति स्वशब्दैर्मध्यवर्तिविक्रियानिषेध
वाचकैरिति यावत् अर्थादपि निषेधे निषेधस्य सिद्धत्वात् पृथङ्निषेधो न युक्त इत्याशङ्क्याह अनु
क्तानामपि यौवनादिसमस्तविक्रियाणां प्रतिषेधो यथा स्यादित्याह शाश्वत इत्यादि नित्यग्रहणेन शाश्वत
ग्रहणस्य पौनरुक्त्यं परिहरन्व्याकरोति शाश्वत इत्यपक्षयलक्षणां विक्रियां प्रतिषेधयति शाश्वत इव । शाश्व
तः अपक्षयो हि स्वरूपेण वा स्याद्गुणापचयेन वेति विकल्पं क्रमेण दूषयति न । यदीयते स्वरूपेण निर
वयवत्वात् निर्गुणत्वाच्च नापि गुणक्षयेणापक्षयः । पुराणपदस्यागतार्थत्वं कथयति अपक्षयविपरीता
पि वृद्धिलक्षणां विक्रियां प्रतिषिध्यते पुराण इति तदेव स्फुटयति यो ह्यवयवागमेनोपचीयते स वर्द्धते अभि
नव इति चोच्यते अयं त्वात्मा निरवयवत्वात्पूर्वमपि नव एवेति पुराणो न वर्धत इत्यर्थः । न म्रियते वेत्येतेन
चरमविकारस्य पौनरुक्त्यमाशङ्क्याह तथा न हन्यते इति विपरिणामप्रतिषेधः हन्यमानेऽपि विपरिणाममानेऽपि
देहे न हन्यते हिंसार्थोऽहन्तिः । अन्यतेन कथं विपरिणामो निषिध्यते तत्राह हन्तिरत्र विपरिणामार्थो द्रष्टव्यः । हिंसा
र्थस्य भवेत्किमित्यर्थान्तरे हन्तिर्व्याख्यायते तत्राह अपुनरुक्ततायै हिंसार्थत्वे मृतिनिषेधेन पौनरुक्त्यं स्यान्नविशेष
धार्थं विपरिणामार्थता भेदबुद्धिरित्यर्थः । एवं व्याख्यानत्यागेनाव्याख्यातपरिणामेन ... इति

धीयतेनेन विदुष इति विशेषो नोपपद्यते इत्यर्थः ज्ञानानन्तरमनुष्ठेयस्याभावाद्ब्रह्मज्ञानोत्तरकाले च तदभावाद्ब्रह्मज्ञा
नहीनस्यैव कर्मविधिरिति समाधत्ते नानुष्ठेयस्याभावाभावविशेषोपपत्तेः विशेषोपपत्तिमेव प्रपञ्चयति अ
ग्निहोत्रादिविध्यर्थज्ञानोत्तरकालमग्निहोत्रादिकर्मानेकसाधनोपसंहारपूर्वमनुष्ठेयं ननु देहाद्व्यतिरिक्ता
त्मज्ञानेविना पारलौकिकेषु कर्मसु प्रवृत्तेरनुपपत्तेस्तथाविधज्ञानवता कर्मानुष्ठेयमिति चेत्तत्राह कर्ताहम
मकर्तव्यमित्येवंप्रकारविज्ञानवतो विदुषो यथानुष्ठेयं भवति आत्मनि कर्ताभोक्तेत्येवं विज्ञानवतोऽपि ब्रह्म
ज्ञानविहीनस्य नाविदुषोनुष्ठेयं कर्मेत्यर्थः देहातिरिक्तज्ञानवद्ब्रह्मज्ञानमपि ज्ञानत्वाविशेषात्कर्मप्रवृ
त्त्युपकारीष्यतामित्याशंक्याह न तु तथा न जायत इत्यात्मस्वरूपविध्यर्थज्ञानोत्तरकालभावि किंचिदनुष्ठे
यं भवति अनुष्ठेयविरोधित्वाद्विक्रियात्मज्ञानस्येति शेषः ननु ब्रह्मात्मैकत्वज्ञानादूर्ध्वमुत्तरकालमपि कर्ता
हमित्यादिज्ञानोत्पत्तेः कर्मविधिसावकाशः स्यादिति नेत्याह किंतु नाहं कर्ता न भोक्तेत्यात्मैकत्वाकर्तृत्वावि
षयज्ञानादन्यत्रोत्पद्यते कारणाभावादिति शेषः कर्तृत्वादिज्ञानमन्यादृशं तत्तु ज्ञानानन्तरं ज्ञानेनापाकृ
तं विशेषाद्विदुषोनुष्ठानं विदुषो नेत्युपसंहरति इत्येष विशेष उपपद्यते नन्वात्मविदां नैवानुष्ठेयं किंचि
दस्ति कथं तर्हि विद्वान्यजेतेत्यादिशास्त्रात्तत्र तत्र कर्माणि विधीयन्ते तत्राह यः पुनः कर्ताहमिति वेत्त्यात्मान
न तस्य ममेदं कर्तव्यमित्येवंरूपा भवति बुद्धिः स्यात्तदपेक्षया सोऽधिकृतः तं प्रति कर्माणि संभवन्ति स चाविद्वा
नुभौ तौ न विजानीत इति वचनात् आत्मनि कर्तृत्वादिज्ञानापेक्षया कर्मस्वधिकृतः स ज्ञानेन तथाविधपुरुष
प्रति कर्माणि विधीयन्ते स च प्राचीनवचनादविद्वानेवेति निश्चीयते न खलु कर्तृत्वादिज्ञानवतस्तद्रूपप्रतीत
कर्तृत्वादिज्ञानद्वारा कर्मसु प्रवृत्तिरित्यर्थः कर्मासंभवे ब्रह्मविदि हेत्वन्तरमाह विशेषितस्य च विदुषः कर्मा
प्रवचनात् य एवंरूप इति वेदाविनाशिनमित्यादिनेति शेषः यद्यपि विदुषो नास्ति कर्म तथापि अविदुषः स्या २२
दित्याशंक्याह तस्माद्विदुषो मुमुक्षोश्च सर्वकर्मसंन्यास एवाधिकारः विद्याविरुद्धत्वादित्यमाणमात्रस्मृति
पत्तान्तु कर्मणामित्यर्थः यद्यपि मुमुक्षोराश्रमकर्माणि विधीयन्ते तथापि विद्यानन्तरलाभाय विरुद्धान्ये
वताभ्युपगतानि अन्यथा विविदिषासंन्यासविधिविरोधादित्यभिप्रेत्याहेत्थं भगवतानुमतमित्याह अतएव

निषध्यमानस्य कर्तुरविक्रियासंभवोऽस्त्वत्र इति पत्रि विरोधादित्यादिनाशंक्याह नत्वविक्रियस्यात्मनो विदितवतः क-
र्म न संभवतीति चेन्न अयमात्मा ब्रह्मेत्यादिश्रुत्या समाधत्ते नाविदुषश्चात्मज्ञानात् किंचैवं विद्वत्ता विशिष्टस्य केवल-
स्य वा नाद्यः विशिष्टस्य विद्वत्ता या विशेषणस्यापि तत्संसर्गस्य च विशेषणांशेऽपि न संघातस्याचेतनत्वाद्विद्वत्ता यु-
क्तेत्याह न देहादिसंघातस्य विद्वत्ता द्वितीयेऽतजीवब्रह्मविभागासिद्धिरित्याह अतः पारिशेष्यादसंहतस्या-
त्मा विद्वान्नविक्रिया किंच प्रामाणिकविरुद्धधर्मवत्त्वस्यासिद्धत्वादात्मनि भासिकस्य च विवक्षितत्वं व्यवहारे नैका-
त्म्याद्वैतानुमानायोगाज्जीवब्रह्मणोरभेदसिद्धिरित्यभिप्रेत्य फलितमाह इति तस्य विदुषः कर्मासंभवाद्वादे-
त्यायुक्तः कथं स पुरुष इति नन्वविक्रियब्रह्मसत्त्वपन्न्यासर्वैव कर्मासंभवे विदुषो विद्वत्तापि कथं संभवति नहि ब्र-
ह्मण्यविक्रियस्य विद्यालक्षणाविक्रियास्तीति योऽभवितुमर्हतीति तत्राह यथा बुद्ध्याद्याहृतस्य शब्दाद्यर्थस्या-
विक्रिय एव सन्बुद्धिवृत्त्यविवेकविज्ञानेनाविद्ययोपलब्धात्मा कल्प्यते एवमेवात्मानात्मविवेकविज्ञानेन
प बुद्धिवृत्त्याविद्यया असद्देहेद्यादिसहकृतनमेतः करणेन शब्दाद्यप्रभावेद्धिपर्यवेसितं परिणते बुद्धिवृत्तिरूच्यते तेन इ-
शनिविनि चेतन्यमभिव्यंजकबुद्धिवृत्त्यविवेकाद्विषयज्ञानमित्युपचर्यते तेनात्मोपलब्धा कल्प्यते तथा-
विद्याप्रयुक्तमिति थ्याऽनवद्यं निवर्तनं तयैवात्यात्मिकसंबंधेन ब्रह्मात्मैक्याभिव्यंजकवाक्योत्थबुद्धिवृत्ति-
द्वाराविद्वानात्मा व्यपदिश्यते न च मिथ्यासंबंधेन पारमार्थिकाविक्रियत्वविहतिरस्तीत्यर्थः अहंब्रह्मेति बु-
द्धिवृत्तेर्मिथ्यात्वेऽप्यात्मनः प्रमाभावादात्मनः सविशेषत्वमाशंक्यात्तस्या व्यावृत्तोपाधित्वमेवेत्याह सत्यरूपयापर-
मार्थतोऽविक्रिय एवात्मा विद्वानुच्यते न तु कूटस्थस्यात्मनो मिथ्यैव विद्यावत्त्वेऽपि तस्य कर्माधिकारनिवृत्तौ
कस्य कर्माणि विधीयन्ते न हि निरधिकाराणां तेषां विधिरित्याशंक्याह विदुषः कर्मासंभववचनाद्यानि
कर्माणि शास्त्रेण विधीयन्ते तान्यविदुषो विहितानीति भगवतो निश्चयो वगम्यते कर्माण्यविदुषो विहिता-
नीति विशेषमाक्षिपति नन्वविद्यापि अविदुष एव विधीयते कर्मविधानमविदुषो विदुषश्चाविद्याविधानमि-
ति विभागे का हानिरित्याशंक्याह विदितविद्यस्यापि पुनर्यपेक्षणेवद्विद्याविधानानर्थक्यात् विद्यायाविदि-
तत्वेलब्धत्वात् कर्मविधिरविदुषो विदुषो विद्याविधिरिति विभागासंभवे फलितमाह तस्मादविदुषः कर्माणि वि-

गी० भा० टी० २३

प्रमाणतो विशेषादित्यर्थः । ज्ञानस्य मनःसंयोगजन्यत्वादात्मनश्च श्रुत्या मनोगोचरत्वनिरासान्नात्मज्ञाने साध
नमस्तीति शङ्कते करणगोचरत्वादिति चेत्तत्र श्रुतिमाश्रित्य परिहरति न मनसैवानुद्रष्टव्यमिति श्रुतेः नतु मस्या
दिवाक्योत्थमनोवृत्त्यैव शास्त्राचार्योपदेशमनुसृत्य द्रष्टव्यमात्मनीति श्रुत्यनेन रूपेण स्वप्रकाशमप्यात्मवस्तु
वाक्योत्थबुद्धिवृत्त्यभिव्यक्तं सविकल्पकव्यवहारालम्बनं भवतीति मनोगोचरत्वोपचारादिद्धं करणगोचरत्व
मित्यर्थः । कथं तर्हि ब्रह्मात्मनो मनोविषयत्वनिषेधश्रुतिरित्याशङ्क्याऽसंस्कृतमनोवृत्त्यविषयत्वविषयेति मत्वा
नः सन्नाह शास्त्राचार्योपदेशशमदमादिसंस्कृतमित्यात्मदर्शने करणं सत्यपि श्रुत्यादौ न द्रष्टृग्राहकाभावा
त्तस्मात्कथमविक्रियात्मज्ञानमुत्पत्तुमर्हतीत्याशङ्क्याह तथा च तदधिगमायानुमाने आगमे च सति ज्ञानं नोत्प
द्यत इति साहसमेतत् न ह्यविक्रियात्मनोऽधिगन्तव्यत्वे विमतो विकारोऽनात्मधर्मो विकारत्वादुभयाभिमतविका
रवदित्यनुमाने एवांत्र श्रुतिस्मृतिरूपागमे च सत्येव तस्मिन्ज्ञानोत्पद्यते ज्ञानमिति वचः सोऽहं समाद्ये सत्येव माने मे
यो न भातीति वदत्यर्थः । ननु यथोक्तज्ञानस्योत्पत्तावपि हानोपादानाप्रवृत्तानुभवतीति कस्तस्य फलं वदन्ना
ह ज्ञाने चोत्पद्यमाने तद्विपरीतमज्ञानमवश्यं बाधनरूपमुपगन्तव्यं अवश्यम्भावि प्रकाशप्रवृत्ते तमोनिवृत्ति
व्यतिरेकेणानुपपत्तिवदात्मज्ञाने निवृत्तिमन्तरेणात्मज्ञानोत्पत्तेरनुपपत्तेरित्यर्थः । नन्वज्ञानस्य ज्ञानप्रागभाव
त्वात्तन्निवृत्तिरेव ज्ञानेन क्रियते न निवर्तकमिति तत्राह तज्ज्ञाज्ञाने दर्शितं हन्ता हतो सोमभौ तौ न विजानीत इति कथं
पुनर्भगवतापि ज्ञानाभावातिरिक्तमज्ञानं दर्शितमित्याशङ्क्याह अत्र चात्मनो हननक्रियायाः कर्तृत्वं कर्मत्वं हेत
कर्तृत्वकर्मज्ञानं नेति दर्शिते विमतं ज्ञानाभावो न भवति उपादानत्वात्स्वप्नादिवदिति भावः । ननु हननक्रियायाश्च
न हिंस्यादिति निषिद्धत्वात्कर्तृत्वादेरज्ञानकृतत्वेऽपि विहितक्रियाकर्तृत्वादेर्न तथात्वमिति नेत्याह तच्च सर्वक्रि
यास्वपि समानं कर्तृत्वादेरविद्याकृतत्वं न तावदात्मनि कर्तृत्वादि नित्यमनिर्मोक्षप्रसंगाच्चानित्यमपि निरुपादा
नं भावकार्यस्योपादाननियमात्तच्चानात्मा तदुपादानमात्मनि न स्वप्रतिभानात्तच्चात्मैव न तदुपादानं तद्दृश्यस्य तस्या
विद्याविनात्मयोगादित्यर्थः । अविक्रियत्वादात्मनः दर्शितेः कर्तृत्वाभावेऽपि कारयितृत्वं स्यादित्याशङ्क्याह विक्रि
यावान्हि कर्तात्मनः कथं स तं नरं प्रयोजयति कुर्विति आत्मनि कर्तृत्वादिप्रतिभानस्य च नाद्यनिर्वाच्यमज्ञानमु २३

भगवान्नारायणः सांख्यान्विदुषोऽविदुषश्च कर्मिणः प्रविभज्य द्वे निष्ठे ग्राहयति ज्ञानयोगेन सांख्यानां कर्मयो
गेन योगिनामिति विदुषोऽविदुषोश्च संन्यासेऽधिकारो विदुषस्तु कर्मणीति विभागस्योक्तत्वादित्यर्थः अधिका
रिभेदेन निष्ठाद्वयं भगवता वेदव्यासेनापि दर्शितमित्याह तथा च पुत्रायाह भगवान्व्यासः द्वाविमावथ पन्था
नावित्यादि अत्रानयोपाध्यायनविधिना स्वाध्यायपाठे एकैकस्य प्रवृत्तेन तत्र क्रियामार्गो ज्ञानमार्गश्चेति
द्वौ मार्गावधिकारिभेदेनावेदितावित्यर्थः आदिपदग्राह्यं वेदाः प्रतिष्ठिता इत्यादि गृह्यते उक्तयोर्मार्गयोः स्व
रूपविहितं मुदाहरणमुत्तरमाह तथा च क्रियापथश्चैव पुरस्तात्पश्चात्संन्यासश्चेति बुद्धिशुद्धिद्वारा कर्मतत्फल
योर्वैराग्योदयात्सर्वकर्ममार्गो विहितः तत्र कर्मपथः संन्यासपूर्वको ज्ञानमार्गो दर्शितः स चेतरस्माद्विशि
ष्यते इतीयमस्तीत्यर्थः उक्ते विभागे पुनरपि वाक्यान्तरमर्थादर्शयति एतमेव विभागं पुनः पुनर्दर्श
यिष्यति भगवानतत्त्ववित्तु अहंकारविमूढात्मा कर्ताहमिति मन्यते तत्त्ववित्तु अहंकारविमूढात्मेत्यस्य व्या
ख्यानं मन्यते इति तत्त्ववित्तु निःशोक अवतारार्थं तात्पर्यार्थं संगृह्णाति नाहं करोमीति एवंविधक्रियापदेन
निषद्धः सर्वधाने विरक्तमधिकृत्य वाक्यान्तरं पठति तथा च सर्वकर्माणि मनसा संन्यस्यास्ते इत्यादि आदिश
ब्दस्तत्रैव स्थापनीयकस्य शब्दसंग्रहार्थः अविक्रियात्मज्ञानात्कर्मसंन्यासे द्योतितो मासकमनसेत्याप यानि तत्र के
चिन्नाहिते मन्यावद्वेत जन्मादिषड्भावविक्रियारहितोऽस्म्यविक्रियो मात्र कर्ता कोऽहमात्मेति न कस्यचिज्ज्ञानमस्ति
घते यस्मिन्सति सर्वकर्मसंन्यासमुपदिश्यते आत्मनोऽज्ञानक्रियाधारत्वेनाविक्रियत्वाभावादविक्रिया
त्मज्ञाने संन्यासकारणमेव तेन सम्भवतीत्यर्थः यथोक्तज्ञानाभावो विषयाभावाद्वा प्रमाणाभावाद्वेति विकल्प्या
द्यं दूषयति न जायते इत्यादिशास्त्रोपदेशानर्थक्यप्रसङ्गात् नैतावद्विक्रियात्मभावो न ज्ञायते म्रियते वेत्या
दिशास्त्रस्याप्रमाणत्वापत्तेश्चाप्रमाणस्यान्तरेण कारणमानर्थक्याभावादित्यर्थः द्वितीयमन्यदाह तथा च शा प
स्त्रोपदेशसामर्थ्यादर्माधर्मास्तित्वविज्ञानपारलौकिककर्मविधिसामर्थ्यात्सिद्धविज्ञानमुदाहरति कर्तृश्च दे
हान्तरसम्बन्धविज्ञानमुत्पद्यते तेन प्रमाणस्यावसरेऽवात्मनोऽविक्रियत्वाकर्तृत्वे कुतोऽविज्ञानं कस्मान्नोत्पद्यते इति
पृष्टव्यास्ते कर्मकाण्डशास्त्रेऽधर्माधर्मविज्ञानोत्पत्तिवज्ज्ञानकाण्डशास्त्रेऽप्यात्मनि विज्ञानोत्पत्तिरविरुद्धा

गी॰
भा॰
टी॰
२४

24

वतिष्ठते न तथा वदेहे कर्माणि मय्यस्याऽक्रियैतो: कारणस्य सुविमासन मिति संबंधे सम्भवाहिसेवणास्य सतिदेहे स
देकर्मत्यागविषयत्वाभावाज्ञेयतः सर्वकर्मत्यागो नास्तीत्यर्थः अथवाऽकर्तनरस्यादिहवेदैवसंबंधनो मलिङ्गा
सिद्धिवांछन्तु देहेस्य स्येत्यारभाऽनुमेयमात्मनः सर्वज्ञाविक्रियत्वनिर्धारणाद्देहे संबंधमन्तरेणाकर्तृत्वकारयितृत्वाश्र
यंश्चाप्युत्तिसंघ प्रसंगपरिहाराय समस्यङ्ग एव संबंधः साधीयानिति समाधत्ते न सर्वज्ञात्मनो विक्रियत्वावधार
णात् अतिस्थितत्वेत्यर्थः किंच संबंधस्याकांक्षाद्वित्रिषिपोस्यनाधीनतां दाकांक्षावशादस्यदेभिमतसंबंधसि
द्धिरित्याह आत्मनांक्रियायाश्चाधिकरणापेक्षत्वात् सर्वदिक्सत्संबंधो न सिध्यति आकांक्षाभावादित्याह नदेन
पेक्षत्वाच्च सत्त्यात्मस्य संन्यासपक्षे स्यादिति पार्थक्त्वात्स्य चाधिकरणापेक्षत्वाद्दस्य हि संबंधसिद्धिरित्याशंक्या
ह सम्बन्धस्तन्यासपक्षस्त्यागार्थोऽनिनिदेपार्थः अन्यथोपसर्गवैयर्थ्यादित्यर्थः तन्मात्रविवेकज्ञानेन सर्वा
णि कर्माणि परित्याज्यात्मदेहे विद्वानित्यसेव संबंधस्य साधुत्वमेतोपसंहरति तस्माद्धीनाशस्यैवाऽऽत्मज्ञानव
तः संन्यासपर्वाधिकारो न कर्मणीति सर्वव्यापारोपरमात्मनः सर्वकर्मसंन्यासस्याविक्रियात्मज्ञानाविरोधि
त्वात्मयोजकज्ञानवतो वैधसंन्यासाधिकारः सम्यग्ज्ञानवतस्त्वेवधेस्वाभाविके फलात्मनीति विभागमस्मुप
सोऽत्रैवं वाक्यशेषानुगुण्यदर्शयति तत्तत्रैवाभिप्रायात्मज्ञानवकरणदृष्टान्तमपिध्यामः आत्मनोविक्रियत्वे
न कर्मासंभवं प्रतिपाद्य अविक्रियत्वहेतुसमर्थनार्थमेवोत्तरग्रंथमवतारयति उक्तं तेनवद्यामः किंतत्कृतमि
तिपृष्टकमानेन्नेत्याह तत्रात्मनो विनाशित्वे प्रतिज्ञाते अविनाशित्वमित्युपलक्षणमविक्रियत्वमित्यर्थः तदेव
दृष्टान्तेन स्पष्टयितुमुत्तरश्लोकमुत्थापयति तत्किमिवेत्युच्यते वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति
नरोऽपराणि तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही २२ आत्मनः स्वतो विक्रियाभावेऽपि उ
पात्तदेहत्यागेन नूतनदेहोपादानेन विक्रियावत्त्वप्रत्यादृविक्रियत्वमसिद्धमिति चेन्नेत्याह वासांसिवस्त्राणि जी
र्णानि दुर्बलतां गतानि यथा लोके विहाय परित्यज्य नवान्यभिनवानि गृह्णाति उपादत्ते नरः पुरुषोऽपराण्यन्या २४
नि तथा तद्वदेव शरीराणि विहाय जीर्णान्यन्यानि संयाति संगच्छति नवानि देही आत्मा शरीराणि जीर्णानि
वयोहानिंगतानि वलीपलितादिग्रस्तानीत्यर्थः वाससांवस्त्राणां नाना परित्यागेन वानोपादानेन त्यागोपा

पादानेन निरहंकृतत्त्वज्ञानादिगुणमिदानीं कर्तृत्वकारयितृत्वयोरभावाद्भगवतोऽनुमतिं दर्शयति तदे
तद्विशेषेण विदुषः सर्वक्रियासु कर्तृत्वे हेतुकर्तृत्वे च प्रतिषेधति भगवान् विदुषः कर्माधिकाराभावश्च
दर्शितार्थे वेदाविनाशिनं नित्यं य एनमजमव्ययम् इत्यादिना विदुषोऽत्यापदि कर्माधिकाराभावो भगवताभिप्रेतस्त
हि कुतस्तस्य जीवतोऽधिकारः स्यादिति पृष्ठे कथं न विदुषोऽधिकार इति ज्ञाननिष्ठाप्रमितत्त्वमात्मनः स्मारयति एतद्
उक्तं एवमेव ज्ञानयोगेन सांख्यानामिति तदेतद्गम्यते सर्वकर्मसंन्यासे च तस्याधिकारोऽस्तीत्याह तथा च सर्वकर्मसं
न्यासं वदति सर्वकर्माणि मनसा संन्यस्यास्ते इत्यादिना वक्ष्यमाणे वाक्ये सर्वकर्मसंन्यासो न प्रतिभाति मानसा
नामेव कर्मणां विशेषणवशात् त्यागावगमादिति शंकते ननु मनसेति वचनाद्वाचिकानां कायिकानां च
संन्यास इति चेन्न विशेषणमनर्थकमाशंक्य दूषयति न सर्वकर्माणीति विशेषितत्वात् मनसेति विशेषणमात्मन
एव कर्मसु सर्वेषां संकल्पितेः स्यादिति शंकते मानसानामेव सर्वकर्मणामिति चेन्न सर्वात्मना मनोव्या
पारत्यागे व्यापारान्तराणामनुपपत्तेः सर्वकर्मसंन्यासः सिध्यतीति परिहरति न मनोव्यापारपूर्वकत्वाद्बा
ह्यव्यापाराणां मनोव्यापाराभावे कर्मानुपपत्तेः मानसस्यापि कर्मसंन्यासे स कोऽपि वागादिव्या
पारानुपपत्तिरिति शंकते [illegible] कर्मणां कारणानि मानसानि वर्जयित्वान्यानि सर्वकर्मा
णि मनसा संन्यस्यास्त इति चेन्न अन्यानीत्यपरत्वे [illegible] कर्मकारणान्यपरत्वे [illegible] मानसानि ता
नि च सर्वाणि कर्माणीत्यर्थः वाक्यशेषमादाय दूषयति नैव कुर्वन्न कारयन्निति विशेषणात् सर्वकर्मसं
न्यासो भगवतोक्तः नहि विवेकबुद्ध्या सर्वाणि कर्माण्युपगम्य [illegible] संन्यस्यतीति युक्तं नैव कुर्वन्नित्यादि
विशेषणस्य विवेकबुद्धेश्च त्यागहेतोरन्त्यत्वादित्यर्थः भगवदभिमतसर्वकर्मसंन्यासस्य तस्य विशेषसंको
चे दर्शयन्नाशंकते [illegible] आसीनो नवद्वारे पुरे [illegible] इति चेत् संन्यासो जीवदवस्थायामेवात्र विवक्षितः [illegible] लिंगदर्शयन्नुत्त
रमाह नवद्वारे पुरे देही आस्ते इति विशेषणानुपपत्तेः अनुपपत्तिमेव स्फोरयति नहि सर्वकर्मसंन्यासेन मृ
तस्य तद्देहे आसनं संभवति अन्वयविशेषान्वाख्यानेन लिंगाभिद्धिं चोदयति [illegible] संन्यासे
शेषेण संयतं तमेव संक्षिप्यति एकाग्रतामापन्नं चित्तं आत्मन्येवेत्येवकारार्थं
कथयति हित्वा बाह्यार्थचिंतामात्मन्येव केवलेवतिष्ठते केवलत्वमद्वितीय
त्वेन स्वात्मस्थितिर्विशेषणेनेति स्वात्मनि स्थितिं लभत इत्यर्थः चित्तस्य हि कल्पित
स्यात्मैव तत्त्वं तत्त्वदृष्ट्यान्यतः सर्वतो वारितं यद्विशिष्टानेनि मदग्रे तिष्ठतीति भा

वः तस्यामवस्थायां सर्वे
भ्यो वा दृष्टतत्त्वलो
ऽक्नो भवविषय
तद्वत्स्पृह
निस्पृहः

६.१८.

अपरिपक्वयोगो यथा दर्शितेन दुःखेन प्रच्याव्यते नैवेचाल्यते यस्मिन्स्थितो योगी तं योगं विद्या
दिति ९ एवंवत् तं विद्यादित्याद्युपरितनेन ९२ पद्यत्रयेणान्वयात् यत्रेति तस्मिन्नात्मावस्थाविशेषे परा
मृशति दुःखसंयोगस्य वियोगो योगसंज्ञितो युज्यते सर्वयोगसंज्ञितः स्यादित्याशंक्याह
विपरीतेति दुःखं हि योगावस्थासमुत्थाने निखिलं दुःखं भेदेन दुःखसंयोगाभावो योगसं

किंच यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः यस्मिन्स्थितो न दुःखेन गुरुणापि वि
चाल्यते २२ यं लब्ध्वा यमात्मलाभं लब्ध्वा प्राप्य चापरमन्यन्न लाभं ततस्तेनाधिकम
स्तीति न मन्यते नोचिन्तयति किंच यस्मिन्नात्मनि तिष्ठन् दुःखेन शस्त्रनिपातादि
लक्षणेन गुरुणा महतापि न विचाल्यते यत्रोपरमते चित्तमित्यारभ्य यावद्भिर्विशेषणैः
विशिष्ट आत्मनोऽवस्थाविशेषो योग उक्तः तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञि
तं स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा २३ तं विद्यात् विजानीयाद्दुःखसंयो
गवियोगं दुःखैः संयोगो दुःखसंयोगः तेन वियोगो दुःखसंयोगवियोगः तं दुःख
संयोगवियोगं योग इत्येव संज्ञितं विपरीतलक्षणेन विद्यात् विजानीयादित्यर्थः योग
फलमुपसंहृत्य पुनरन्वारम्भेण योगस्य कर्तव्यता च्यते निश्चयानिर्वेदयोः योगसाध
नत्वमर्हतीत्यर्थः उपसंहृते योगफले किं पुनर्योगस्य कर्तव्यमुच्यते तत्राह योगफलमिति ९८
प्रकारान्तरेण योगस्य कर्तव्यतोपदेशारम्भो ज्ञानान्तरेभः योगेषु ज्ञानलक्षणं कोऽसि
द्धिमलभमानः संशयानो निवर्तेतेति तन्निवृत्त्यर्थं पुनः कर्तव्यतोपदेशाग्रथ्यतानिति
मतार्ह निश्चयेति नयोः साधनत्व विधानमेव ... प्राप्नोति मध्यपाति

काले एवंवत्तव कर्मकारकत्वेन निर्दिष्टमात्मानं तत्पदार्थत्वेन व्याचष्टे परमिति आत्मनीत्य
स्यापि पदार्थविषयत्वमाह स्वप्रकाशेति परमात्मनि शनैश्चोपचितभावेनापरोक्षतोऽवबुद्धे हि द्वैतमा
वाभ्यां ततो वेत्तार्थः तस्मिन्काले योगी समाहितो भवतीति शेषः योगस्य हि काले प्रकारान्तरेण
प्रकटयति किं चेति बुद्धिग्राह्यः स्वानुभवविषयः इन्द्रियनिरपेक्षस्वानुभवगम्यत्वेनाक्षैरतीन्द्रिय
मिति पुनरुक्तिमित्याशङ्क्याह अविषयेति पदच्छेदेन चेन्द्रियैरविषयत्वादिति तथा आत्मस्वरूप
यत्र चैव यस्मिंश्च काले आत्मनात्मसमाधिपरवशेन तत्त्वतः करणेनात्मानं पश्यन्नेव तत्त्वं सर्व
तोऽपि स्वरूपं पश्यन्नुपलभमानः स्वप्रकाशमिति तुष्यति तुष्टिं भजते किं च सुखमा
त्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियं वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः २१ सुखमा
त्यन्तिकमनन्तमेव सुखमात्यन्तिकं तत्तेनाभिसंबन्धः यत्तद्बुद्धिग्राह्यं बुद्ध्यैवेन्द्रिय
निरपेक्षया ग्राह्यमतो बुद्धिग्राह्यमतीन्द्रियमिन्द्रियगोचरातीतमविषयजनितमित्य
र्थः वेत्ति तदीदृशं सुखमनुभवति यत्र यस्मिन्काले न चायं विद्वानात्मस्वरूपे स्थितः
तस्मात्तत्त्वतश्चलति तत्त्वतः तत्स्वरूपात्प्रच्यवत इत्यर्थः

इति तस्मात्तत्त्वतश्चलतीति संबन्धः नैवेत्येवकारसंबन्धोक्तिः चकारसंबन्धस्यासंबन्धनीयः
यत्रेति एवंवत्तकार्यान्तरेण प्रकटयति योगविशिष्टं हि किं चेति आत्मलाभात्परं विद्य
तइति स्मर्यमाणमाचष्टे यमात्मलाभमिति लाभान्तरं पुरुषार्थं मन्यते तत्त्वतस्मादात्म
लाभाद्धितियावता नविद्यादित्युत्तरत्र संबन्धः यस्मिन्निमाद्यवस्थारूपा किं चेति

तत्रैव स्थितिमेव मनसो विदधीतेति आत्मैवेति योगविधिमुपक्रम्य किमिदमुक्तमित्यपेक्षायामाह
एषश्रुतिः यस्मान्मनसो नैश्चल्यमिति शेषः । ननु मनसोऽशक्यत्वादि मनसो निमित्तानुरोधेन रागद्वेषैर्व
शात् स्वतः केवलमस्थिरस्य मनसः तत्स्वभावेन प्रवृत्तस्य नैश्चल्यं निश्चलत्वेनेति तत्राह । तत्रे
ति योगप्रारंभः सम्यगर्थः । एवं प्रारब्धेन मनसैवैतत्प्राप्यते प्रकारेणानवस्थिते स्वाभाविको दोषा
न्मिथ्याज्ञानस्थो रागादिप्राप्तावेतन्मनसो नियमनं कथमित्याशंक्याह । ततस्ततो नियम्येति यावा
आत्मसंस्थं आत्मनि स्थितं आत्मैव सर्वं न ततोऽन्यत् किंचिदस्तीत्येवं आत्मसंस्थं मनः
कृत्वा न किंचिदपि चिन्तयेत् एषा योगस्य परमा विधिः । तत्रैवमात्मसंस्थं मनः कर्तुं
प्रवृत्तो योगी यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् । ततस्ततो नियम्यैतदात्मन्येव व
शं नयेत् २६ यतो यतो यस्मात् यस्मान्निमित्तात् शब्दादेर्निश्चरति निर्गच्छति स्वभा
वदोषान्मनश्चञ्चलमत्यर्थं चलमत एवास्थिरं ततस्ततस्तस्मात्तस्माच्छब्दादेर्निमित्ता
न्नियम्य तत्तन्निमित्तं याथात्म्यनिरूपणेनाभासीकृत्य वैराग्यभावनया चैतन्मन आ
त्मन्येव वशं नयेत् आत्मवश्यतामापादयेत् एवं योगाभ्यासबलाद्योगिन आत्मन्ये
व प्रशाम्यति मनः । प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् । उपैति शान्तरजसं ब्रह्मभूत
मकल्मषम् २७ प्रशान्तमनसं प्रशान्तं मनो यस्य स प्रशान्तमनाः । तं प्रशान्तमनसं ह्येनं यो
गिनं निरूपणेनाभिसन्धः एवमेतिश्रुत्वा यथालोचनेनैतेन तत्तद्वैराग्यभावनया तत्तदभावीकृत्य
ततस्ततो नियम्यैतदात्मन्येवेति स्ववशः मनसो वशीकरणेन योगस्य मे किं स्यादित्याशंक्याह एव
मिति योगाभ्यासो विषयविवेकं ... मनोनिग्रहात्सर्वेति प्रशान्ते आत्मन्येव प्रलीनमिति याव
त् मनस्तद्वृत्त्योरभावे स्वरूपस्थं तत्तद्वाविर्भावस्थापादोषशान्तं रजो यस्येति रजः मोहादिक्लेशा

इह जन्मनि जन्मान्तरे वा सेव्यमानो नित्यमवसायायोगाभ्यासः कर्तव्यः इत्यस्य योगस्य कर्तव्यत्वमिति प्र
तिजानीते किं चेति केनचित् क्रमेण कर्तव्यत्वमित्यपेक्षायामाह संकल्पेति संकल्पः शोभनाध्या
सः सर्वानित्युक्त्वा च नूनमशेषत इति च न उक्तमित्यार्थं व्याह निःशेषतेति यथा शेषो न भवति
तथा सर्वेषां कामानां शोभनाध्यासाधीनानां त्यागस्य योगाङ्गत्वमुक्त्वा विशेषणत्वाद्विवेकपूर्वके
न मनसा करणभूतेन यस्य सर्वतो नियमनमपि तच्छेषत्वेन कर्तव्यमित्याह किं चेति काम

समपध्यानं फलयोगो निश्चयेनाध्यवसायेन योक्तव्यः अनिर्विण्णचेतसा न निर्विण्णम
निर्विण्णमस्य चित्तं किं तत्र ज्ञाने लाभे निर्वेदरहितेन चेतसा चित्तेनेत्यर्थः । किं च संकल्पप्रभवा
न्कामांस्त्यक्त्वा सर्वानशेषतः । मनसैवेन्द्रियग्रामं विनियम्य समन्ततः । संकल्पप्रभवान्
कल्पः प्रभवो येषां कामानां ते संकल्पप्रभवाः कामास्तान्त्यक्त्वा सर्वानशे
षतः निःशेषतः निर्लेपेन किं च मनसैव विवेकयुक्तेनेन्द्रियग्रामम् इन्द्रियसमुदायं विनि
यम्य विनियमनं कृत्वा समन्ततः समन्तात् शनैः शनैरुपरमेद् बुद्ध्या धृतिगृहीतया
आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् शनैः शनैः न सहसा उपरमेत् उपरतिं कु
र्यात् केन बुद्ध्या किंविशिष्टया धृतिगृहीतया धैर्ययुक्तयेत्यर्थः

त्यागद्वारा इन्द्रियाणि गृहीत्वा किं कुर्यादित्याशंकितारं प्रत्याह शनैः शनैरिति सहसा विषये
भ्यः सकाशादुपरमेत् मनो सा न सामर्थ्यं संभवतीत्यभिप्रेत्याह न सहसेति न सहसा धैर्येण युक्तया बु
द्धिरित्याह केनेत्यादिना स्वस्मादीरस्याहतत्पर्यन्ताः गृहीतो रहस्यं वेदस्य वेदधारणं कृतवान्
उक्तोऽनरस्य क्रमेण शनैर्लाभं पदमिति भावः आत्मसंस्थं मनो निश्चलं ध्यानमात्रनिष्ठं मनो ध्ये
ध्यायन् चिन्तयेत् नव्याभावाद्गतिसुखमभवेदित्याह आत्मेति

गी· भा· टी· १००

विषमेषु प्राणिषु तदनुरोधात् विषममेव दर्शनं समदर्शनमिति विवेकं वक्तुं प्रस्तौति सर्वत्रेति उक्तं स्वैक-
त्वज्ञानस्य फलं विकल्पतत्प्रकोपशैथिल्यमाह एतस्येति तदेकत्वदर्शनमनुवदति यो मामिति तस्या-
त्मनिष्ठानोऽनुपलभ्यमानाति तस्येति ज्ञानानुवादभागं विभजते यो मामिति तस्य लौकिकभागं व्याच-
ष्टे तस्याहमिति अनेकत्वदर्शिनो योऽयं ऐश्वर्यनिमित्तप्रणाशः प्राप्तस्तन्नाशमाह नेति अहं परमात्मा नेदं
ततः प्रति परोक्षीभवामीत्यर्थः सच मे त्वादि व्याचष्टे विद्वानिति विद्वानिवाविद्वानपि सोऽपि तस्य न नश्य

योगयुक्तात्मा समाहितान्तःकरणः सर्वत्र समदर्शनः सर्वेषु ब्रह्मादिस्थावरान्तेषु वि-
षमेषु सर्वभूतेषु सममेकरूपं संस्कारवर्जितं विक्रियावर्जितं समं निर्विशेषं ब्रह्मात्मैकत्वेन दर्शनं य-
स्य स सर्वत्र समदर्शनः एतस्यात्मैकत्वदर्शनस्य फलमुच्यते यो मां पश्यति सर्वत्र सर्वं च मयि
पश्यति तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ३० यो मां वासुदेवं पश्यति सर्वस्यात्मा-
नं सर्वभूतेषु सर्वत्र पश्यति ब्रह्मादिस्तम्बपर्यन्तं सर्वं च ब्रह्मादिभूतजातं मयि सर्वात्मनि पश्यति तस्यैवमा-
त्मैकत्वदर्शिनः अहमीश्वरो न प्रणश्यामि न परोक्षतां गमिष्यामि स च मे न प्रणश्यति
स च विद्वान् मम वासुदेवस्य न प्रणश्यति न परोक्षो भवति तस्य च मम चैकात्मकत्वात् स्वात्मा हि
नामात्मनः प्रिय एव भवति यस्माच्चाहमेव स योगी मयि वर्तते सर्वात्मैकत्वदर्शी सर्वभूत-
स्थितं यो मां भजत्येकत्वमास्थितः सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ३१ सर्वभूतस्थि-

तीत्यादि श्लोकोक्तं नेत्यादिना अविद्वद्रूपेण सतोऽपि व्यवहितत्वाद्विद्याप्राप्तव्यतामपनेतुमर्थः ई-
श्वरस्य विदुषश्च परस्परमपरोक्षत्वे हेतुमाह तस्य चेति आत्मैकत्वेऽपि कथमित्याशङ्क्य प्रेमास्पदत्वमाह
स्वात्मेति विद्वदीश्वरयोरेकत्वानुवादेन विद्याफलं विवृणोति यस्मादिति तस्मादेकत्वदर्शी नार्थ

१००

तस्यास्मदादिविलक्षणमाह ब्रह्मभूतमिति अस्मदादेरपि सतो ब्रह्मभूतत्वेन [illegible]त्वं जीव-
न्मुक्तं तमित्याशंक्याह अकल्मषमिति धर्माधर्मशून्यत्वेनधादियुक्तस्याप्युक्तं स्वबुद्धिविषयाशंक्योक्तं
अकल्मषमिति उक्तं सर्वत्वे योगिनो भवतीत्युक्तं तदेव स्फुटयति युञ्जन्निति एकमोपायोक्तं मनसैवे-
न्द्रियग्राममित्यादियोगाभ्यासेन रागद्वेषादिः सदात्मानं युञ्जन्निति संबंधः पापरहितं सुखेन तण
युक्तस्यापि संस्पर्शसत्तादात्म्यं एकत्वस्य उक्तं विषयासंस्पर्शः योगमनुतिष्ठति ब्रह्मभूतस्य

उपैति गच्छति शान्तं रजः संवृत्तीणमोहादिक्लेशं शान्तरजसमित्यर्थः ब्रह्मभूतं जीवन्मुक्तं
ब्रह्मैव सर्वमिति निश्चयेन ब्रह्मभूतमकल्मषं धर्माधर्मादिवर्जितमित्यर्थः । युञ्जन्नेवं स-
दात्मानं योगी विगतकल्मषः सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते २८ युञ्जन्नेवमिति एवं स-
दात्मानं युञ्जन् योगी योगान्तरायवर्जितः सदा सर्वदा आत्मानं युञ्जन् विगतकल्मषः
विगतपापः सुखेनानायासेन ब्रह्मसंस्पर्शं ब्रह्मणा संस्पर्शो यस्य तद् ब्रह्मसंस्पर्शं
सुखमत्यन्तं निरतिशयं अश्नुते प्राप्नोति २८ इदानीं योगफलं योगस्य ब्रह्मैकत्वदर्शनं सर्वत्र
समदर्शित्वं दर्शयति सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ईक्षते यो-
गयुक्तात्मा सर्वत्र समदर्शनः २९ सर्वभूतस्थमिति सर्वभूतेषु स्थितमात्मानं सर्वभूतानि
चात्मनि ब्रह्मादिस्तम्बपर्यन्तानि सर्वभूतानि आत्मन्येकतामागतानि ईक्षते पश्यति कः

निरतिशयसत्त्वशान्तिलक्षणं द्वितीयो मोक्षो हेतुना केन स्यादित्याकांक्षायामाह इदानी- गी.
मिति स्वमात्मानं मीलितं इति संबंधः सर्वभूतान्यपि तद्विशेषणत्वेन पश्यति चेत्तत्र इव कल्मता टी.
न्मितितताविधानेन [illegible]रित्याशंक्याह सर्वभूतानीति उक्तं दर्शनं चित्तसमाधानेन युक्तोपायदर्शनाय ६

गी॰ भा॰ टी॰ ९२

101

नत्वाप्नुयाद्योगसुखमुत्तममिति शेषः मनसश्चञ्चलत्वेपि निग्रहद्वारा योगस्थैर्यं संपादयतामित्याशंक्या
ह प्रसिद्धमिति कृषतेर्विलेखनार्थस्य रूपमिति कृष्णेति कर्षकत्वमेव कामस्य भग
वतः स्वभावतोस्याशंकयाह प्रमाथीति ऐहिकामुष्मिकसर्वसंपदामाकर्षणशीलत्वात्तेनेत्युक्त्या
मपन्नाति लोभयति न केवलं लोभकमेव प्रकरणशीलमिति विक्षिपतीत्युक्तं निवारकत्वमभिप्रेत्याह विषया॥

एतस्य यथोक्तस्य सम्यग्दर्शनलक्षणस्य योगस्य दुःखसंपाद्यतामालक्ष्य शुश्रूषुर्ध्रुवं तेन
त्वाप्नुयाद् अर्जुन उवाच योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन एतस्याहं न पश्या
मि चञ्चलत्वात्स्थितिं स्थिरां ३३ योऽयं योगस्त्वया साम्येन समत्वेन प्रोक्तः हे मधुसूदन ए
तस्य योगस्याहं न पश्यामि नोपलभे चञ्चलत्वान्मनसः किं स्थिरामचलां स्थितिं प्रसिद्ध
मेतत् चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढं तस्याहं निग्रहं मन्ये वायोरिव सुदुष्कर
म् ३४ चञ्चलं हि मनः कृष्ण कृष्णेति कृषतेर्विलेखनार्थस्य रूपं भक्तजनपापादिदोषा
कर्षणात्कृष्णः हि यस्मान्मनः चञ्चलं न केवलमत्यर्थं चञ्चलं प्रमाथि च प्रमथनशीलं प्रम
थ्नाति शरीरमिन्द्रियाणि च विक्षिपति परवशीकरोति किं च बलवत्प्रबलं न केनचिन्नियन्तुं
शक्यं किं च दृढं तन्तुनागवदच्छेद्यं तस्यैवंभूतस्य मनसोऽहं निग्रहं निरोधं मन्ये वायोरिव यथा
वायोर्दुष्करो निग्रहस्ततोऽपि मनसो निग्रहं दुष्करं मन्ये

द्ताकृष्टमपाकाले विशेषणान्तरमाह किंचेति प्रबलेति विशेषणान्तरमाह किंच दृढमिति ते ९१
न्तुनागो वरुणपाशो हि तेजस्कचारी पदार्थो मनः तद्वत्तत्त्वादच्छेद्यमशक्यं तेन प्रसिद्धेत्याद्वि
तः वायोरिवेत्यस्यार्थमाह यथेति प्रश्नमेवं कृत्वा प्रतिवचनमनुष्यापयति भगवानिति

गम्यादिशब्दितस्य यमनियमादिसंस्कारवतः स्वैरं ब्रह्मसंभवेपि नाभंगीकृत्य ज्ञानेत्योति सर्वथे
ति प्रतिभासतोपि विषयेषु हेयोपादानाकारेऊ तो ज्ञानवतो नित्यमुक्तत्वेष्वाशेषोप्ते दुराचारश्नि वैधादि
त्याशंक्याह नमोस्तुमिति स्वैराचरणस्याप्रतिवंधकत्वे कथंनात्पर्थोद्दुरस्य योगिनः समस्त
दीनेश्वत्यप्रतिवंधकत्वशसकाविचेति शान्यदपि किं विदुच्यते परमयोगिनो निर्देशद्वारा यो
गमाहात्म्यमित्यर्थः उपमैवौपम्यमात्मावतद्गौपम्यं चतेन सर्वभूतेषु सुखं समंपश्यतीत्युक्ते

दुःखेनतत्वेशोकात्मे समस्यदृशीनं मन्यतस्फलमोहो विधीयते सर्वथा सर्वप्रकारैः
वर्तमानोपि समस्य दृष्टीयो योगी सर्ववैकल्पवेपुरेषु वर्तते नित्यमुक्तः एवसः नमोस्तुश्रुति
केनचित्तमुक्ति वयानवंदपथः किंचान्यत आत्मौपम्येन सर्वत्र समं पश्यति योर्जुन सुखं वा
यदि वा दुःखं स योगी परमो मतः ३२ आत्मा स्वयमेव उपमीयते येन तत्सुखं मानंदावतौ
पम्यं तेनात्मौपम्येन सर्वत्र सर्वभूतेषु समं पश्यति योर्जुन सच किं समं पश्यतीत्य
पेक्षाते यथा मम सुखं प्रियं तथा सर्वेषां [illegible] सुखं [illegible] प्रियं दुःखं च
द्वेद्यं स्वसम प्रतिकूलमिति दुःखं यथा मम तथा सर्वेषां प्राणिनां दुःखमिति प्रतिकूलमित्येवमा
त्मौपम्येन समं पश्यन् न कस्यचित् प्रतिकूलमाचरति अहिंसक इत्यर्थः एवंभूतोहिंसकः सम्यग्दर्शननिष्ठः स योगी परमो मत

नन्वेवं सम्यग्दर्शनेनिष्ठस्य [illegible] किमित्याशंक्य [illegible] स्वार्थेनेत्याचष्टे यति वाश
हृदि उपदर्शनेनसम्यग्दर्शनं फलमभिलषति नकस्यचिदिति किमवेत पातस्य परमत्वेन
ज्ञात्वा सर्वेति मनश्चंचलमसिर [illegible] योगस्यस्थितिं [illegible] कं मितिमन्वानलङ

भा- टी- १.२

थेनः कृतयत्नस्य वश्यतो सिद्धिरिति वैराग्याभ्यासावश्यावतामवति न त्वन्यथेत्याह यततेति उपायतो वै-
राग्यादिरूपेणैको मनोनिरोधः अस्मिन्नरमुत्थापयति तत्रेत्यादिना मनोनिरोधस्य दुःसाध्यत्वे
साधनीकार्यं परिहरति अस्मिन्नेव कारणेऽतिलब्धोदयाचेति सम्बन्धः लोकद्वयप्रापककर्मसंभवे
ऽक्ते योगिनो नाशमाशंक्य तन्नाशं कथयाह योगाभ्यासेति तथापि योगानुष्ठानपरिपाकपरि-
प्राप्यतत्त्वसम्यग्दर्शनसामर्थ्यान्मोक्षोपपत्तेऽनन्तस्य नाशाशङ्केति चेत्सैवमनेकान्तरायप्रबला-
द्योगस्येह जन्मनि प्राप्ययतमसंसिद्धेरसिद्धेरित्यभिसंधायाह योगसिद्धीति अभ्युदयति: अप्रयत्न

102

यतस्तु तः वश्यात्मा अभ्यासवैराग्याभ्यां वश्यत्वमापादित आत्मा मनो यस्य सोऽयं
वश्यात्मा तेन वश्यात्मना तु यतता भूयोऽपि प्रयत्नं कुर्वता शक्योऽवाप्तुं योग उपायतः यथो-
क्तादुपायात् तत्र योगाभ्यासाङ्गीकरणेन परलोकेहलोकप्राप्तिनिमित्तानि कर्माणि
संन्यस्तानि योगसिद्धिफलं च मोक्षसाधनं सम्यग्दर्शनं न प्राप्तमिति योगी योगमा-
र्गान्मरणकाले चलितचित्त इति तस्य नाशमाशंक्य अर्जुन उवाच अयतिः श्रद्ध-
योपेतो योगाच्चलितमानसः अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ३७ अयतिः अ-
प्रयत्नवान् योगमार्गे श्रद्धया आस्तिक्यबुद्ध्या चोपेतो योगात् अन्तकाले च चलितं
मानसं मनो यस्य स चलितमानसः भ्रष्टस्मृतिः अप्राप्य योगसंसिद्धिं योगफलं सम्य-

वहिर्भावो नाशः योगमार्गे तत्फलस्य सम्यग्दर्शनस्यादर्शनादितिशेषः नहि तत्त्वो बहिर्मुखत्व-
मेवान्यतित्वे संन्यस्तमित्याशंक्याह अयतिरिति नहि योगमार्गमाश्रितोऽनेनेत्याह योगादिति मरणका- १.२
ले व्याकुलेन्द्रियस्य ज्ञानसाधनानुष्ठानावकाशाभावात् पूर्वोक्तं तत्त्वलितमानसमित्याशंक्याह
भ्रष्टेति गम्यतेऽनेनेति गतिः फलम् सामान्यप्रश्नेऽप्यर्थो विशेषप्रश्नोऽद्रष्टव्यः अप्राप्येवं विहत्य

उ॰ तः संशयपराहित्यं तत्राह मनइति कथं तर्हि मनो निरोधो भवति तत्राह किंत्विति अभ्यासस्वरूप
सामान्येन निर्दिशति अभ्यासो नामेति कस्यांचिच्चित्तभूमावित्यविशेषतो ध्येयो विशयो निर्दिश्य
ते समानप्रत्ययप्रवृत्तिर्विजातीयप्रत्ययानन्तरितेति शेषः चित्तस्येति षष्ठी प्रत्ययस्येति हि कार
णे तेनार्थो वैराग्यस्वरूपं निरूपयति वैराग्यमिति तेषु वैतृष्ण्यं वैराग्यं नामेति शेषः तद्धेतुस्
वयति दोषेति विषयेषु तृष्णा विषयेषु दोषदर्शनेनाभ्यस्यमानेन वैतृष्ण्यं जायते तेन गृह्यमा

श्रीभगवानुवाच एवमेव यथा ब्रवीषि असंशयं महाबाहो मनो दुर्निग्रहं चलं अभ्यासे
न तु कौन्तेय वैराग्येण च गृह्यते ३५ असंशयं नास्ति संशयो मनो दुर्निग्रहं चलमित्येतत्
महाबाहो किं तु अभ्यासेन तु अभ्यासो नाम चित्तभूमौ कस्यांचित् समानप्रत्ययावृत्तिश्चित्त
स्य वैराग्यं दृष्टादृष्टेष्टभोगेषु दोषदर्शनाभ्यासाद्वैतृष्ण्यं तेन च वैराग्येण गृह्यते विक्षे
पचरूपप्रचारः चित्तस्यैवं तन्मनो गृह्यते निरुध्यत इत्यर्थः यः पुनरसंयतात्मा तेन असं
यतात्मना योगो दुष्प्राप इति मे मतिः वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ३६
असंयतात्मना अभ्यासवैराग्याभ्यामसंयत आत्मान्तःकरणं यस्य सोऽयमसंयतात्मा तेनासंय
तात्मना योगो दुष्प्रापो दुःखेन प्राप्यत इति मे मतिः

णो निर्दिशति विक्षेपेति तस्मिन्नुदहीतो निरुद्धं मनो निरोधस्य किं साधनमित्यपेक्षायामाह एव
मिति अभ्यासहेतुर्वैराग्येण दृढतरं चित्तप्रचारनिरोधे निरुध्यते किं मनो विषयाद्विमुखमतः
भवतीत्यर्थः संयतात्मनो योगप्राप्तिः फलमेव कृतार्थतिरेके दर्शयति यः पुनरिति व्य
तिरेको यत्नाद्यदर्शनेऽपि मनःप्रत्याकरोति असंयतेति एवंविधान्वयव्याख्यानं परमनुनयाद्व्या

गी॰ भा॰ टी॰ १०३

उभयभ्रष्टस्यापि श्रेयोहि प्रमेणप्रमादे: सामिकृतस्य वर्णाद्वैश्यभावादुपपन्नं शुभकृत्त्वं कथंत्र
त्रस्यानीय: शिष्यसंबोधनेति पितृत्वेन तच्छब्दस्य तात्पर्यं कथयति तनोतीति तेन पुत्रस्थानीयस्य
शिष्यस्य तातेति संबोधनमविरुद्धमित्यर्थ: न गच्छतीत्युक्तां गतिं कल्याणकारित्वात्प्रति
नाप्तुमभाव: योगभ्रष्टस्य लोकद्वयनाशाभावे किं भवतीत्यपेक्षिते किं त्विति तत्र श्लोकेनो
त्तरमाह केषांचिन्मतमेवं विशेष्यते तत्राह सामर्थ्यादिति कर्मणि ज्ञाने च स्थितं कर्मयोग
मार्गे प्रवृत्तस्य तपसानेनत्याग्रहन्नावपि फलाभिलाषविकलसंग्रहेण समर्पितं सर्वं कर्मणा सङ्गत्या

न हि यस्मात्कल्याणकृच्छुभकृत्कश्चिद्दुर्गतिं कुत्सितां गतिं हे तात तनोत्यात्मानं
पुत्ररूपेणेति पिता तात उच्यते पितैव पुत्र इति पुत्रोऽपि तात उच्यते शिष्योऽपि
पुत्र उच्यते अत: शिष्योऽपि तात उच्यते न गच्छति किं त्वस्य भवति प्राप्य पुण्यकृतां लो
कानुषित्वा शाश्वती: समा: शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ४१ योगमा
र्गे प्रवृत्त: संन्यासी सामर्थ्यात्प्राप्य गत्वा पुण्यकृतामश्वमेधादियाजिनां लोकांस्तत्रो
षित्वा वासमनुभूय शाश्वतीर्नित्या: समा: संवत्सरांस्तद्भोगक्षये शुचीनां यथोक्त
कारिणां श्रीमतां विभूतिमतां गेहे गृहे योगभ्रष्टोऽभिजायते अथवा योगिनामे
व कुले भवति धीमतां एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ४२ अथवा श्रीमतां कुला
दन्यस्मिन्योगिनामेव दरिद्राणां कुले भवति जायते धीमतां बुद्धिमतां एतद्धि जन्म

यत्कालान्तरकारणादित्यर्थ: समानानि सुखेमानुषसमाविलक्षणानि वैराग्याभाववित्तपावि
त्र्यश्रीमतामेहस्यैतेति विशेष्यते शुद्धा वैराग्यादिकल्याणायैकपदे तत्रमाह अथवेति यो
गिनामिति कर्मिणां ... श्रीमतामेवेति विशिनष्टि धीमतामिति ब्रह्मविद्यावतां शुचीनां द
रिद्राणां कुले जन्म दुर्लभं महदेकारणाभावादित्याह एतद्धीति किमर्थं दरिद्राणां
जन्मनो दु:खबहुलत्वेऽपि दु:खबहुलत्वमत आह एवमिति

१०३

नापुनाच्छिद्रेषु विकलितमभ्रे यथा नश्यति तद्वदित्याह छिन्नेति नाशशंकानिमित्तमाह निष्ठया इति कर्ममार्गरूपावष्टंभाभावे विज्ञानमार्गे वा भ्रष्टस्य भविष्यतीत्याशंक्याह विमूढ इत्यादि ति नहि कर्मिणः श्रेयोमार्गेण फलाभिलाषं त्यक्त्वा स्वर्गं समर्प्य वा कर्माणि निष्ठा निरूपयाद्गुणान वचनात्संभवान्तरे कर्मसंन्यासिनस्तु विहितानां त्यागाज्ज्ञानोपायस्य च युच्यतेरनर्थ प्राप्ति काय कृतेति भावः एतदेव स्पष्टयितुं संशयापाकरणार्थमर्जुनो भगवन्तं प्रेरयन्नाह एतदिति म नो त्वत्तः कश्चिदिह ऋषिर्वा देवो वा नान्योऽस्य संशयच्छेत्तेत्याशंक्याह तदन्यमिति ग्रन्थस्य संशयच्छे

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः प
थि ३८ कच्चिन्नोभयविभ्रष्टः कर्ममार्गाद्योगमार्गाद्वा विभ्रष्टः सन्नुभयविभ्रष्टः छिन्ना
भ्रमिव नश्यति न नश्यति किं अप्रतिष्ठो निराश्रयो हे महाबाहो विमूढः सन् ब्रह्मणः
पथि ब्रह्मप्राप्तिमार्गे एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः त्वदन्यः संशयस्या
स्य छेत्ता न ह्युपपद्यते ३९ एतन्मे मम संशयं कृष्ण छेत्तुमपनेतुमर्हस्यशेषतः कार्
त्स्न्येन त्वदन्यः त्वत्तोऽन्यः कश्चिदृषिर्देवो वा छेत्ता नाशयिता संशयस्यास्य न हि यस्मा
दुपपद्यते संभवति अतस्त्वमेव छेत्तुमर्हसीत्यर्थः श्रीभगवानुवाच पार्थ नैवेह ना
मुत्र विनाशस्तस्य विद्यते न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ४० हे पार्थ नैवे
हलोके नामुत्र परस्मिँल्लोके वा तस्य विनाशो न विद्यते नास्ति विनाशो वा महदेवस्यापि

त्र भावे फलितमाह अतद्रूपेति योगिनो नाशशंकापरिहरन्नुत्तरमाह भगवानिति पञ्चभि भयभ्रष्टो योगी न नश्यतीत्याह पार्थेति नैवेहेत्याह नहीति योगिनो मार्गरूपावष्टम्भस्य हि कर्तृनाशः ... न भवतीत्यत्राह ... कर्माणां ... नाशश्च ... नाशकारणं ... ...

गी॰ भा॰
टी॰
१०४

योगजसंस्कारस्याधर्माभिभूतस्य कार्यमहत्वे तेनाभिभावकप्राबल्ये ध्यासः स्यादित्यापरीकाह
ततः तयत्रेति कालव्यवधाना त्रिहूत्रिणोक्ति तेनेति तत्ततजलौकादृष्टानत्पत्त्या संस्कारस्य
दीर्घेनायाः समधिगततनादिति भावः कैमुत्रिकन्यायेनाि परमसन्नगाद्दुविमजते जिज्ञासुरपी
त्यादिना अत्रापि संन्यासीति विशेषणमेवं वक्ष्यधेयमित्याह सामर्थ्यादिति नहिकर्मीकर्मा
र्गे प्रवृत्तस्तेनो भ्रष्टः शंकितुं शक्यते अतः संन्यासीत्येवोक्तं विशेषणं विशेषा योगभ्रष्टो
भ्रष्टः सोऽपि वैदिकेन कर्मणा तत्फलेनापि वर्तते किं सत्ततयोगेनुष्ठानविष्टः संन्यासरूपेण कर्मणे

यस्मात् एवं योगोऽपि सयोगभ्रष्टः न हि तेषां योगाभ्यासजनितेन संस्कारेण फलवत्तरमधर्मादि
लक्षणं कर्मनिष्टा योगाभ्यासजनितेन संस्कारेणाहिंपते अधर्मश्चेत् बलवत्तरः कृतेनैव
न योगेनापि संस्कारोऽभिभवतन एवं तत्तत्सत्त्व योगजः संस्कारः स्वयमेव कार्यमारभ
ते न दीर्घकालावस्थस्यापि विनाशस्तस्यास्तीति अतो जिज्ञासुरपि योगस्य स्वरूपं ज्ञा
तुमिच्छन्नपि योगमार्गे प्रवृत्तः संन्यासी योगभ्रष्टः सामर्थ्यात्सोऽपि शब्दब्रह्म वे
दोक्तकर्मानुष्ठानफलमतिवर्तते कर्मानुष्ठानफलमतिक्रामतीति किमुत बुद्ध्वा यो
३. गंतन्निष्ठाभ्यासं कुर्यादिति तस्माद्योगित्वं श्रेय इति प्रयत्नाद्यतमानस्तु योगी संशुद्ध
किल्बिषः अनेकजन्मसंसिद्धस्ततो याति परां गतिं ४५ प्रयत्नादधिकं प्रयत्नाद्यतमानो

फलेनातिवर्ततेति वक्तव्यमिति योजना योगनिष्ठस्य कर्मतत्फलातिवर्तनेन तेनाधिकफला
वाप्तिर्वक्तव्येति योगनिष्ठस्य श्रेष्ठत्वे हेत्वन्तरं वक्तुं उत्तरश्लोकमवतारयति ... श्रेयइत्य
नेति... (illegible) ...
ति प्रयत्ना दिति तत्र योगविषये प्रयत्नातिरेके ... तत्र ... न ... त्वा ...
नियावत्समत्वत्रुमस्यासृद्गतं यत्नेव प्रयत्नाद्युक्तः संस्यासि ... ते ... सि ...

यद्यपि विस्मृतिमतामपि शुचीनां गृहे जन्म दुःखलभ्यं तथापि न श्रीमतां गृहे जन्म दुःखलभ्यमतएव
तो दृष्टान्तः शुचीनां दरिद्राणां विद्यावतामिति विशेषणोपेते कुले लोके जन्म वतनुमानमित्यर्थः
एतद्दुर्लभं जन्म योगिनां तस्यात्र महेतोर्हि हेतुनर्मवाह यस्मादिति बुद्धेत्यासक्तविषयोविशेषः एवंस्मिन्देहे
भवं तत्रानुष्ठितसाधनविशेषणयुक्तमित्यर्थः तर्हि यथोक्तजन्मनि साधनानुष्ठानमेव ते रोव
बुद्धिसंबन्धः स्यादित्याशंक्याह यतते चेति प्रयत्नः एवमनुष्ठानविषयः पौर्वदेहिकः संस्का
रात्सकाशाद्यतनं तत्र भवति यतते तथा चाग्रिहोत्रनिष्ठ यस्मादित्याशंक्याह एवेति सोऽहं याग

एतद्धि दुर्लभतरं लोके जन्म यदीदृशं यथोक्तविशेषणे कुले यस्मात् तत्र तं बुद्धिसंयोगं लभ
ते पौर्वदेहिकं यतते च ततो भूयः संसिद्धौ कुरुनन्दन ४३ तत्र योगिनां कुले तं बुद्धिसंयो
गं बुद्ध्या संयोगं बुद्धिसंयोगं लभते पौर्वदेहिकं पूर्वस्मिन्देहे भवं पौर्वदेहिकं यतते च प्र
यत्नं करोति ततस्तस्मात् पूर्वकृतात्संस्कारात् भूयो बहुतरं संसिद्धौ संसिद्धिनिमित्तं हे कुरु
नन्दन कथं पुनः पौर्वदेहिकं बुद्धिसंयोगमिति चेदुच्यते पूर्वाभ्यासेन तेनैव ह्रियते ह्यव
शोऽपि सः जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ४४ पूर्वाभ्यासेन यः पूर्वजन्मनि कृ
तोऽभ्यासः पूर्वाभ्यासस्तेनैव बलवता ह्रियते

भ्रष्टः समनन्तरजन्मनि तत्संस्कारवशात् तस्मिन् जन्मनि निष्ठाबुद्धियत्नादियोगं प्रतिवाकृष्टो
भवतीत्यर्थः तत्रैव मुनिकन्यायस्य च यति जिज्ञासुरिति एवं हि विभजते यः पूर्वेति तस्मा
च्छ्रेष्ठयातस्य श्रद्धानिमित्तविशेषः यो जन्मश्रद्धया धर्मोद्दिश्यति वेद्योपि न हि पूर्वाभ्यासवशाद्बुद्धिसंब
न्धः स्यादित्याशंक्याह तेत्यादिना यदि यागजन्मश्रेष्ठेन यागाभ्यासजसंस्कारश्रावल्यात्स वर्तते पु
धर्मश्रमेदेन पूर्वमहे तस्मान्न दानेन संस्कारेणावकृष्टः कृतः सज्जिज्ञासुरिह तोऽपि बुद्धिसंबन्धमाप्नुयात्

गी· भा·
टी·
१०५

इति श्रीगीताभाष्यटीकायां षष्ठोऽध्यायः ६ योगिनामिति कर्मसंन्यासात्मकसाधनेषु ध्यानेनैव प
धानेष्वधानेनावाप्रथमषट्कव्याख्यानमुपसंहरन्नुपास्यनिष्ठत्वं दर्शयन्द्वितीयषट्कव्याख्यानमारभमाणः
सप्तमेनराध्यायमवतारयति योगिनामिति अनेनाध्यायेनोत्तमङ्गतेनान्तरात्मना यो मां भजते मा
मिति प्रश्नबीजं प्रदर्शयत् कीदृशो भगवतस्तत्त्वं केन वा नानन्तरात्मा स्यादित्याकाङ्क्षायां सप्तमे षष्ठाद्वये ज्ञाते
स्वरूपमेव भगवान् प्रथमेन द्वन्द्व मिथ्याज्ञानेन नानित्यर्थः परमेश्वरस्य तत्त्वमालोच्य विशेषतो स

105

योमां स एवमामयुक्ततमो मतः अतिशयेन युक्तः सतेनाभिप्रेत इति इति श्रीमत्परमहंस
परिव्राजकाचार्यश्रीशंकरभगवत्पूज्यगीताविवरणे षष्ठोऽध्यायः ६ योगिनाम
पि सर्वेषां मद्गतेनान्तरात्मना श्रद्धावान्भजते यो मां स मे युक्ततमो मतः इति प्रश्नबी
जमुपन्यस्य स्वयमेव कीदृशं मद्रूपं तत्त्वमेवं मद्गतान्तरात्मा स्यादित्येतद्विवक्षुः भगवानु
वाच मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः असंशयं समग्रं मां यथा ज्ञास्यसि
तच्छृणु १ मयि वक्ष्यमाणविशेषणे परमेश्वरे आसक्तं मनो यस्य मय्यासक्तमनाः
पार्थ योगं युञ्जन्मनःसमाधानं कुर्वन् मदाश्रयः अहमेव परमेश्वर आश्रयो यस्य मदा
श्रयः यो हि कश्चित्पुरुषार्थेन केनचिदर्थी भवति स तत्साधनं कर्माग्निहोत्रादि त
पो दानं वा कश्चिदाश्रयं प्रतिपद्यते अयं तु योगी मामेवाश्रयं प्रतिपद्यते

कलत्रगृहादिकत्वादिना निविधविस्मृतिभागित्वेन तत्रासक्तिं मनसो विषयान्तरपरिहारेण हि गो
चरमालोच्य मयैनामगवत्त्वच्च प्रतिष्ठितं भवतीत्यर्थः तथापि स्वाश्रयपुरुषो मनःस्थापयन्ते १०५
नात्मेत्याशंक्याह मदाश्रय इति योगिनो यदाश्रयत्वेन तस्मिन्नेवासक्तमनस्त्वमुपन्य
स्तं तदुपपादयति यो हीति ईश्वराव्याश्रयस्य प्रतिपत्तिमेवप्रकटयति हित्वेति

योगस्य सर्वस्मादुत्कृष्टत्वप्रदर्शनाय योगिनः सर्वाधिकत्वं साधयति तपस्विभ्य इति
योगिनो ज्ञानिभ्यः पंडितेभ्यो ऽधिकत्वं तस्य ज्ञानिभ्योऽधिकत्वमित्याशंक्याह ज्ञानमिति योगिनः
सर्वाधिकत्वे फलितमाह तस्मादिति तत्त्वादिनो विशेषात्मा स्वेकारणमतर मितेषा
मुपासकानां भ्रष्टाप्रसंगो योगिनां गम्यते तेषां कतमः श्रेयानित्यपेक्षायामाह योगिनामिति योग्म
गवतः सगुणनिर्गुणत्वाद्यवस्थानं नचेतसा श्रद्धधानः सन्नयतनमनुसंधत्ते सयुक्ततमो मध्योत

तत्र योगी विद्वान् संश्रुतः किंविधः संपूर्णयोग्यो जन्मशतं किंचित् चित्तं स
स्कारं ज्ञानेनैवायं चित्पतेनापवित्रेणानेकजन्मकृतेन संसिद्धोऽनेकसंसारशुद्धत्वात्
तत्त्वसम्यग्दर्शनः सन् परां प्रकृष्टां गतिं याति यस्मादेवं तस्मात् तपस्विभ्योऽधिको
योगी ज्ञानिभ्योऽपि मतोऽधिकः कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ४६
तपस्विभ्यश्च तीव्रवासनादिनाशाशरीरसंशुष्ककारिणः तपस्विनस्तेभ्योऽपि श्रेयानधिको
योगी ज्ञानिभ्योऽपि ज्ञानं शास्त्रार्थपांडित्यं तद्वद्भ्योऽपि योगी श्रेष्ठ इति श्रेष्ठः मतो
ज्ञातः कर्मिभ्यः श्रौतस्मार्तहोत्रादिकर्मवद्भ्योऽपि योगी अधिको विशिष्टः यस्मात्तस्मा
द्योगी भवार्जुन योगिनामपि सर्वेषां मद्गतेनान्तरात्मना श्रद्धावान् भजते यो मां
स मे युक्ततमो मतः ४७ योगिनां सर्वेषामपि रुद्रादित्यादिध्यानैकपरायणानां मद्गतेन
मय्यासक्तेनान्तरात्मना ... करणेन श्रद्धावान् श्रद्दधानः सन् भज
मपि वासुदेवे समाहितेनान्तरात्मना युक्तेन ... योगिनामपि ... मद्गतेनान्तरात्मना ...
ष्टा येन युक्तः श्रेयानिति ... योगिनामपि ... योगस्य चाविशेषेण तत्मतान्तर
नेनाध्यायेन कर्मयोगस्य संन्यासहेतोर्मयादाष्टांगयोगस्य ... ज्ञान
शुद्धाय योगपदेशेन योगभ्रष्टस्याप्यतिनाशशंका ...
निष्ठानां ... वाक्यार्थज्ञानान्मुक्तिरिति सिद्धं

गी॰
भा॰
टी॰
७-६

भगवत्तत्त्वज्ञानस्य विशिष्टफलत्वमुक्त्वा फलितमाह ज्ञानमिति ज्ञानस्य दुर्लभत्वेन वक्ष्यमाणं सर्वं केवक
रयति कथमित्यादिना सहस्रेषु शब्दस्य बहुवाचकत्वमुपेत्य व्याकरोति अनेकेष्विति सिद्धये
सत्त्वशुद्धिद्वारा ज्ञानोत्पत्तये इत्यर्थः। सिद्धार्थं यतमानानां कथमिह सिद्धत्वमित्याशङ्क्याह सि
द्धा एवेति सर्वेषामेतेषां ज्ञानोत्पत्त्या तस्य फलभवत्वमित्याशङ्क्याह तेषामिति ज्ञानार्थं प्रय
त्नसमनन्तरं ज्ञानलाभस्य तदुपपद्यते ऽतो दुर्लभत्वाभिधानस्य श्रोतृप्ररोचनफलत्व
मित्याह श्रोतारमिति आत्मनः सर्वात्मकत्वेन परिच्छिन्नतां सर्वतत्त्वप्रकृतिद्वयं प्रकृतिद्वय
लभ्यत इत्याह इति भूमिशब्दस्य व्यवहारयोग्यस्थूलपृथिवीविषयत्वं व्यावर्तयति भूमिरिति

106

मुक्तत्वेनोपमः सर्वज्ञो भवतीत्यर्थः। अतो विशिष्टफलत्वाद् दुर्लभं तज्ज्ञानं कथमिति
वोच्यते मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मां
वेत्ति तत्त्वतः ३ मनुष्याणां सहस्रेषु अनेकेषु कश्चिद्यतति प्रयत्नं करोति सिद्धये सि
द्ध्यर्थं तेषां यततामपि सिद्धानां सिद्धा एव हि ते ये मोक्षाय यतन्ते तेषां कश्चिदेव मां वे
त्ति तत्त्वतो यथावत् अतः श्रोतारं प्ररोचनेनाभिमुखीकृत्याह भूमिरापोऽनलो वा
युः खं मनो बुद्धिरेव च अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ४ भूमिरिति पृथि
वीतन्मात्रमुच्यते न स्थूला भिन्ना प्रकृतिरष्टधेति वचनात् तथा अबादयोऽपि तन्मा
त्राण्येव आपोऽनलो वायुः खं मनः

मध्ये

ति तद्धेतुमाह भिन्नेति प्रकृतिसमभिव्याहारात् तन्मात्रं स्थूलपृथिवीप्रकृतिः स्थूला वि
काराः भूमिरित्युक्तेन विशेषणेनेत्यर्थः। भूमिशब्दवाच्यानामपि स्थूलत्वभ्रान्तिविष
यत्वमाह तथेति तेषामपि प्रकृतिसमानाधिकृततया विशेषात् तन्मात्राण्येव पूर्वं प्रवेशके
तीनां सूक्ष्मत्वं स्थूलविकाराणां न विशेषणत्वमित्यर्थः। मनःशब्दस्य संकल्पविकल्पात्मकस्य

१-५

अस्तु योगिनस्तदाश्रयत्वमिति यन्मनसस्तथैवासक्तिस्तथापि किं मायायानमित्याशंक्याह इति
मार्ईस्याचेष्ट सत्यमेवामिति एवम्भूतो यथोक्तध्याननिष्ठयुक्त एषवदेव मय्यासक्तमना यस्त
न्यथाविधः स्वतन्त्रसंशयमविद्यमानः संशयो यत्र तत्तेन तथ्या स्यान्न्यथा मां समग्रं ज्ञास्यतीति
संबंधः समग्रमित्यस्यार्थमाह विभूतिज्ञानादियुक्तस्वरूपप्रतिपत्तिः वलप्रयोगेऽगतसाम
र्थ्यं संवर्द्धमानगतज्ञानलक्ष्य ऐश्वर्यं मोक्षरूपमित्यनवच्छिन्नमोक्षं ज्ञानसामर्थ्यं ज्ञाद्दिक्षुत्वेन ज्ञाने
ज्ञाय्य स्थित्यन्ते असंशयमिति यद्यस्मात्सर्वविशेषणं विशदयन्नुक्तिस्वपदेन संबंधकथप्र

हित्वान्यत्साधनान्तरं मय्येवासक्तमना भवति सम्यगेवं भूतः सन् असंशयमसम
समग्रं विभूतिबलशक्तैश्वर्यादिगुणसमग्रं मां यथा येन प्रकारेण ज्ञास्यसि संशयमन्त
रेण तच्छृणु भगवानिति तत्सर्वमुच्यमानं मया तन्मे शृणु ज्ञानं तेऽहं सविज्ञानमिदं
वक्ष्याम्यशेषतः यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते २ ज्ञानं तेऽहमिहेस
विज्ञाने विज्ञानसहितं स्वानुभवसमुत्थं इदं वक्ष्यामि कथयाम्यशेषतः कार्त्स्न्येन
तज्ज्ञाने विशदितं स्वोत्तिष्ठायुक्तमभिसन्धीकरणाय यज्ज्ञात्वा यज्ज्ञानं ज्ञात्वा नेह भूयः
पुनः ज्ञानं विषयरूपं मोक्षसाधनं च वशिष्यते नावशेषो भवतीति

ति संशयमिति विना संशयेन भगवत्तत्त्वपरिज्ञानमेव स्फोरयति एवमिति भगवन्नवेज्ञान
वो कथं ज्ञानं शृणुदेव्यात् तेन हि तावत् तेन तदुपदेष्टा कस्त्वरूढस्त्वित्याशंक्याह तच्छृणु एवेति ज्ञा
स्यसीत्युक्तापरोक्षज्ञानं चैतन्यत्वस्य सविज्ञानमपरोक्षीकृतं मे किं स्यादित्याशंक्याह यज्ज्ञात्वे
ति इदमाचेतनस्यापरोक्षत्वेनावगम्यते ततः सविज्ञानमिति विशेषणेनानुस्फुरत्संतत्वश
वणात् इदं तत् फलोपन्यासेन तथा तरन्त्यवणं श्रवणं करोति तज्ज्ञानमिति एकं विज्ञानेन स
विज्ञानं स्फुटितं मा भूदित्याशंक्याह मन्नवेज्ञेति

गी॰ भा॰ टी॰ १०७

कथंचिदुत्पन्नत्वान्नत्वात्यन्तमर्थान्तरत्वम् : अन्यामत्यन्तविलक्षणामिति यावत् अन्यामेव स्पष्टयति
विशुद्धामिति प्रकृतिशब्दस्यार्थपक्षं स्पष्टयन्नेवमाह ममेति प्रकृष्टत्वमेव भोक्तृत्वेन स्पष्टयति
जीवभूतामिति प्रकृतेरत्वं तद्भूतत्वात् प्रकृतेरवान्तरविशेषमाह ययेति नहि जीवरहितं जगद्धा
रयितुं शक्यमित्याशयेनाह अन्तरिति उक्तं प्रकृतिद्वयं कार्यलिङ्गकमनुमानं प्रमाणयति एत
द्योनीनीति प्रकृतिद्वयस्य जगत्कारणत्वे कथमीश्वरस्य जगत्कारणत्वमुपगतमित्याशङ्क्या
ह अहमिति एतद्योनीनीत्युक्ते समनन्तरं प्रकृतिजीवस्य प्रकृतावेव तत्त्वं स्यात् तद्व्यवधानात्
प्रकृतिमात्रं कथं व्याकरोति एतदिति सर्वाणि चेतनानि जडानि भूतानीत्यर्थः : क्षेत्रज्ञकारणत्वे

जीवभूतां क्षेत्रज्ञलक्षणां प्राणधारणनिमित्तभूतां हे महाबाहो यया प्रकृत्या इदं
धार्यते जगत् अन्तः प्रविष्टया एतद्योनीनि भूतानि सर्वाणीत्युपधारय अहं कृ
त्स्नस्य जगतः प्रभवः प्रलयस्तथा ६ एतद्योनीनि एते परापरे क्षेत्रक्षेत्रज्ञलक्षणे प्र
कृती योनिर्येषां भूतानां तानि एतद्योनीनि भूतानि सर्वाणीत्युपधारय जानी
हि यस्मान्मम प्रकृती योनिः कारणं सर्वभूतानामतोऽहं कृत्स्नस्य समस्तस्य जगतः
प्रभव उत्पत्तिः प्रलयो विनाशः तथा प्रकृतिद्वयद्वारेणाहं सर्वज्ञ ईश्वरो जगतः का
रणमित्यर्थः यतस्तस्मात् मत्तः परतरं नान्यत्किंचिदस्ति धनंजय मयि सर्व
मिदं प्रोतं सूत्रे मणिगणा इव ७ मत्तः परमेश्वरात्परतरमन्यत्कारणान्तरं किंचिन्ना

न प्रकृतिद्वयमेवेति चेत् कथमहमित्याशङ्क्य किमित्याशङ्क्याह यस्मादिति मम प्रकृती पर
मेश्वरस्योपाधिभूते योनिरित्यर्थः नहि प्रकृतिद्वयकारणमीश्वरस्येति जगतोऽनेकविधकार
णतो कारणत्वं स्यादित्याशङ्क्याह प्रकृतीति अपरप्रकृतेरचेतनत्वात् परमप्रकृतेश्च तन्त्रत्वेऽपि
किंचिज्ज्ञत्वादीश्वरस्यैव सर्वज्ञस्य सर्वकारणत्वं युक्तमित्याह सर्वज्ञेति प्रधानान्तरस्य तात्पर्य
मेव तत्परमात्मनोऽपि परात्परं नास्त्येव स्यादित्याशङ्क्य प्रकृतिद्वयद्वारा सर्वकारणत्वमीश्वर

107

नवेत्यहंकाराभावे संकल्पविकल्पयोरसंभावात्तदात्मकं मनः संभवतीत्यर्थः । निश्चयलक्ष
णा बुद्धिरित्यभ्युपगमाद्बुद्धिशब्दस्य निश्चयात्मककरणविषयत्वमाशंक्याह बुद्धिरिति न
हि हिरण्यगर्भसमबुद्धिरूपमन्तःकरणव्यष्टिबुद्धिः सिद्ध्यतीत्यर्थः । अहंकारस्याभिमानो विशे
षात्मकत्वेनान्तःकरणभेदत्वे व्यावर्तयति अहंकार इतीति अविद्यासंयुक्तमित्यविद्या
त्मकमित्यर्थः । कथं मूलकारणस्याहंकारशब्दत्वमित्याशंक्योक्तमर्थं दृष्टान्तेन स्पष्टयति
यथेत्यादिना मूलकारणस्याहंकारशब्दत्वे हेतुमाह प्रवर्तकत्वादिति तस्य प्रवर्तकत्वे च

मन इति मनसः कारणमहंकारो गम्यते बुद्धिरित्यहंकारस्य कारणं महत्तत्त्वं ।
अहंकार इत्यहंकारमविद्यासंयुक्तमव्यक्तं यथा विषसंयुक्तमन्नं विषमुच्यते एवमहं
कारवासनावदव्यक्तं मूलकारणमहंकार इत्युच्यते प्रवर्तकत्वादहंकारस्य अहंका
र एव हि सर्वप्रवृत्तिबीजं लोके दृष्टं इतीयं यथोक्ता प्रकृतिर्मे मम ऐश्वरी मायाश
क्तिरष्टधा भिन्ना भेदमागता ॥ ४ ॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां जीवभूतां म
हाबाहो ययेदं धार्यते जगत् ॥ ५ ॥ अपरा न परा निकृष्टा अशुद्धा अनर्थकरी संसा
रबन्धनात्मिकेयं इतः अस्या यथोक्तायास्त्वन्यां विशुद्धां प्रकृतिं मम आ
त्मभूतां विद्धि मे परां प्रकृष्टां

पञ्चयति अहंकार एवेति सत्येवाहंकारे ममकारो भवति तयोश्चाभावे सर्वाप्रवृत्तिरिति
प्रसिद्धमित्यर्थः । उक्तां प्रकृतिमुपसंहरति इयमिति इयमित्यपरोक्षसाक्षिदृश्येति याव
त्स्पष्टयति मायेति तस्यास्त्वनेकाकारेण परिणामयोग्यत्वं द्योतयति भिन्नेति अष्टधे
त्यष्टभिः प्रकारैरिति यावत् अपरत्वं तत्र गमयति उत्कृष्टस्य चैतन्यस्याविद्यागणके वाह्यत्वमस्या
पि प्रकृतित्वेनोक्तेः प्रकृतिमनन्तरश्लोकं योजयति अपरेति निकृष्टत्वं स्पष्टयति अनर्थकरीति अनर्थक

गी॰
भा॰
टी॰
७

त्वसामान्यात्मके परस्मिन्नीश्वरे ईश्वरे प्रोतास्तद्विशेषास्तदुपादानत्वेन तत्स्वभावत्वादित्यर्थः । मयि
सर्वमिदं प्रोतमित्यस्यैव प्रपञ्चरूपमर्थं प्रकारान्तरमाह पुण्य इति पृथिव्यां पुण्यशब्देनाद्यः स
सुरभिर्गन्धः । साहमस्मीत्यत्र वाक्यार्थं कथयति तस्मिन्निति कथं पृथिव्यां गन्धस्य पुण्यत्वेन तत्रा
ह पुण्यत्वमिति यत्तु पृथिव्यां गन्धस्य स्वाभाविकं पुण्यत्वं तद्दर्शितेन तत्त्वादिषु रसादेरपि स्वाभा
विकं पुण्यत्वोपलक्षणार्थमित्याह पृथिव्यामिति पृथ्वीमात्रमात्राः पञ्चापि गुणाः पुण्या अ
वशिष्टा इति भगवतो विभूतय इति भावः । कथं तर्हि गन्धादीनामपुण्यत्वं प्रतिभातं तत्राह
अपुण्यत्वं त्विति तदेव स्फुटयति संसारिणामिति गन्धादयः स्वकार्यैः भूतैः परिणममा

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ । जीवनं सर्वभूतेषु तपश्चास्मि तपस्वि
षु ९ पुण्यः सुरभिर्गन्धः पृथिव्यां चाहं तस्मिन्मयि गन्धभूते पृथिव्यां पुण्य
गन्धस्य स्वभावत एव पृथिव्यां दर्शितं अप्स्वादिषु रसादेः पुण्यत्वोपलक्षणार्थं अपु
ण्यत्वं तु गन्धादीनामविद्याधर्मापेक्षं संसारिणां भूतविशेषसंसर्गनिमित्तं तद्भव
तीति तेजः दीप्तिश्चास्मि विभावसौ वह्नौ तथा जीवनं सर्वभूतेषु येन जीवन्ति सर्वाणि भू
तानि तज्जीवनं तपश्चास्मि तपस्विषु तस्मिंश्च तपसि मयि तपस्विनः स्थिताः बीजं मां स
र्वभूतानां विद्धि पार्थ सनातनं बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहं १० बीजं प्ररो

नाः प्राणिनां पापादिवशात् अपुण्यत्वं स्यादित्यर्थः । यच्चाग्नौ तेजस्तदहं तेन सर्वे प्राणिनो विना
ह तेजस्विति जीवनं भूतेषु सर्वाणि भूतानि निर्वर्तन्तामित्याह तथेति जीवनशब्दार्थमाह १०८
येनेति अयमसेनाभूताभ्येनेत्यर्थः तपश्चास्मीत्यादेस्तात्पर्यमाह तस्मिंश्चेति चित्तैकाग्र्यम
नाशकादिस्तपः स्वरूपानीश्वरप्रोतास्तपस्विनां विशेषण भावविशेषः स्वं तत्त्वं चामाचादिस्य
र्थः । ननु सर्वाणि भूतानि स्वकारणे प्रोतानि कथं तेषामपि प्रोतत्वं तत्राह बीजमिति बीजं तत

108

[illegible]

परतरपदार्थमाह मत्तइति स्यात्तत्राज्ञानन्त्यर्थमेतत्प्राह : निषेधफलं तं कथयति अहमेवे
ति सर्वं जगत्कारणत्वेनसिद्धमर्थं द्वितीयार्द्धव्याख्यानेन विशदयति यस्मादेवा दीर्घेश्रुतिर्य
त्वचपटत्वादितेशृततेतश्रु पदस्यानुगतिरुवगम्यते तद्वन्मय्येवानुगतेजगदित्याह दीर्घेति प
थाचमृतय : स्तैः तु स्तम्भैस्तन्वाद्विपतेत तदभावेविश्वकीर्यते तथामय्येवात्मस्थितेन सर्वं व्या
प्ततेनापि : कृत्स्नविन्नष्टमेवस्यादितिश्लोकार्थ इष्टान्तमाह सूत्रेचेति गवादीनां रसादिष्व
तत्त्वतीतस्वयमेव सर्वप्रोतमित्ययुक्तमिति मतोत्पद्धति केवेति तेषान्तरस्वन्तरद्रव्यैवद्दयोप
ति उच्यतरूति सारोमधुरोहेविदितियावत् रसोऽहमिति कथं तत्राह तस्मिन्निति अप्स्वाप्र

मयि परमेश्वरे सर्वमस्तानि सर्वमिदं जगत्प्रोतं मत्सूत्रेमणिगणा तथापि तमित्यर्थः दी
र्घतन्तुपटवत् सूत्रे मणिगणाइव केतकेन यमेणविशेषेणापि सर्वं प्रोतमित्युच्य
ते रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः प्रणवः सर्ववेदेषु शब्दः खे पौरुषं
नृषु ८ रसश्चाहमप्यां सारः रसः तस्मिन् रसरूपेमयि आपः प्रोता इत्यर्थः
एवं सर्वत्र यथाहमप्सु रसः एवं प्रभास्मि शशिसूर्ययोः प्रणव ओंकारः सर्ववेदेषु त
स्मिन् प्रणवरूपेमयि सर्वे वेदाः प्रोताः तथा खे आकाशे शब्दः सारभूतः तस्मिन्
प्रोतं खं तथा पौरुषं पुरुषस्य भावः यतः शुक्रविन्दुषु तस्मिन् पौरुषे मयि पुरुषाः प्रो

ता: सारस्तस्मिन्नपि मधुरसंस्कारणस्थितेप्रोतात्वा इति वदन्तरव्याख्यानेकर्तव्यमित्या
ह एवमिति उक्तमर्थं दृष्टान्तेन नाग्रभासोमितिव्याचष्टे प्रभेति चन्द्रादित्ययोः प्रभारूपे
मयि तौ प्रोतावित्यर्थः तद्वाक्यार्थं कथयति तस्मिन्निति प्रणवरूपे परस्मिन् वेदा नोप्रोता
त्वविदाकाशे सारभूतः शब्दरूपपरमेश्वरे प्रोतमाकाशमित्याह तथेति पौरुषं न
ष्विति भागे हर्षवीर्यादिभ्यो अजनेन तन्प्रणालिका पुरुषत्वमेव विशदयति पौरुषमिति

गी॰ नहि तत्त्वितत्रिवृत्ताधीनत्वेन तज्जायमानभावाधीनत्वेन वापि स्यादिति क्रियावतस्तदयोरिह
भा॰ दूतत्वप्रसक्तिरित्याह यद्यपीति ममपरमार्थत्वात्तेषां च कल्पितत्वान्न तत्कृतगुणदोषास्पदतामित्य
टी॰ र्थः तेषामपि नत्वेव स्वतन्त्रत्वासंभवात्किमिति कल्पितत्वमित्याशंक्याह हेतुनेति त्रिवि
१०५ धानां भावानां न स्वातन्त्र्यमीश्वरकार्यत्वेन तदधीनत्वात्तथा च विकल्पितत्वमधिष्ठानस्या
त्रातीतिस्यामेव ततुत्वान्नमात्रवशिष्टिरित्यर्थः सतोऽनुररस्य स्वातन्त्र्यनिर्मग्नत्वाद्दोषचक्र

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये । मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ १२ ॥

109

ये चैव सात्त्विका भावाः सत्त्वनिर्वृत्ता भावाः पदार्थाः राजसा रजोनिर्वृत्तास्तामसास्तमोनिर्वृत्ताश्च ये केचित्प्राणिनां स्वकर्मवशाज्जायन्ते भावाः तान्मत्त एवेति जायमानानिति एवं विद्धि सर्वान्समस्तानेव यद्यपि ते मत्तो जायन्ते तथापि न त्वहं तेषु तदधीनः तद्वशः यथा संसारिणः ते पुनर्मयि मद्वशा मदधीनाः एवंभूतमपि परमेश्वरं नित्यशुद्धबुद्धमुक्तस्वभावं सर्वभूतात्मानं निर्गुणं संसारदोषबीजप्रदाहाय मां नाभिजानाति जगदित्यनुक्रोशं दर्शयति भगवान् तच्च किंनिमित्तं जगतोऽज्ञानमित्युच्यते

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् । मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ १३ ॥

त्रिभिर्गुणमयैर्गुणमयैर्विकारैः रागद्वेषमोहादिप्रकारैर्भावैः ;

तो जगतस्तदात्मकस्य संसारित्वमित्याशंक्य तदज्ञानादित्याह एवंभूतमपीति यद्यप्येवं चो-
ऽविद्यमाने कस्मात्त्वामात्मभूतं स्वप्रकाशं सर्वो जनस्तथा न जानातीति मन्वानः शं- १०५
कते न त्वेवेति श्लोकेनोत्तरमाह उच्यत इति एभ्यः परमित्यत्र पंचकं तदुच्यते अव्ययमिति

चैतन्यस्याभिव्यंजकं ततत्निश्चयसामर्थ्यं बुद्धिस्तद्वतां या बुद्धिस्तद्रूपेणमपि बुद्धिमतः श्रोतामवेत्यत्या
ह किंचेति प्रागल्भ्यवतां यत्प्रागल्भ्यं तद्रूपेणमपि तद्वतः श्रोतास्मीत्याह तेजइति तद्धि प्रागल्भ्यप
रपराभिभवसामर्थ्यं परैरप्रधृष्यत्वं वा येन तद्बलवतां बलं तद्रूपेणमपि तेषां श्रोतास्मीत्याह ब
लमिति कामक्रोधादिरूपं स्यापि बलः स्यान्नमतिवारयति तद्वेति कामरागेत्येकार्थं कामरा
गेत्यार्थभेदमावेदयति कामस्त्विन्यादिना विशेषणसामर्थ्यसिद्धं चार्थं वेन्नदर्शयति नन्वि

सनातनमेचिरंतनं किंच बुद्धिर्विवेकशक्तिरंतःकरणस्य बुद्धिमतां विवेकशक्तिमतामस्
स्मि तेजः प्रागल्भ्यं तद्वतां तेजस्विनामहं बलं बलवतां चाहं कामरागविवर्जितं ध
र्माविरुद्धो भूतेषु कामोस्मि भरतर्षभ ११ बलं सामर्थ्यमोजो बलवतां चाहं तच्च बल
कामरागविवर्जितं कामश्च रागश्च कामरागौ कामः तृष्णाऽसंनिकृष्टेषु विष
येषु रागो रंजना प्राप्तेषु विषयेषु ताभ्यां कामरागाभ्यां विवर्जितं देहादिधा
रणमात्रार्थं बलमहमस्मि न तु यत्संसारिणां तृष्णारागकारणं किंच धर्मावि
रुद्धो धर्मेण शास्त्रार्थेनाविरुद्धो यो भूतेषु प्राणिषु कामो हि यथा देहधार
णमात्राद्यर्थोऽशनपानादिविषयः कामोस्मि भरतर्षभ किंच

ति शास्त्रार्थाविरुद्धकामभूतेष्वपि तथाविधकामवतां भूतानां श्रोतास्मीति श्रोतव्ये विवादि
त्याह किंचेति धर्माविरुद्धं कामस्योदाहरति यथेति चिदानंदयोरभिव्यंजकानां भावा
नामीश्वरात्मनाभिधानादन्येषामनवात्मत्वप्राप्तावुक्तं किंचेति प्राणिनां तैर्विधेयत्वं
दर्शयन्वाक्यार्थमाह येकेचेति

गी॰ भा॰ टी॰ ११०

भगवन्निष्ठाया मायातिक्रमहेतुत्वेन तदेकनिष्ठत्वमेव सर्वेषामुचितमिति चेदुच्यते पदिति पाप
कारित्वेनाविवेकरूपमलया हिंसानृतादिरूपयत्नात् दुःखमोजन्तूनां न भगवन्निष्ठत्वमिति दर्शयन्ना
ह उच्यत इति सोऽयं पापकारित्वेहेतुरजस्तमःप्रधानो हर्षः समुचितनमिवतिरस्कृतं ज्ञानं स्वरूपं चेत
न्यमेषामिति तथाकेषां न हि तन्निष्ठत्वात्कथं कुरितं तत्राह ये तु न इति तेभजन्ते भगवन्तमित्यर्थो
ष: ये तां भजन्ते ते किं सर्वमायां तरन्तीत्येवं प्रार्थनायां चतुर्विधानाह चतुर्विधा इति आपन्न
संसारबंधनान्मुच्यन्त इत्यर्थः पदितां प्रपन्ना मायामेतां तरन्तीति कस्मात्तामेव सर्वे
न प्रपद्यन्त इत्युच्यते न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः मायया पहृतज्ञाना
आसुरं भावमाश्रिताः १५ न मां परमेश्वरं दुष्कृतिनः पापकारिणो मूढाः प्रपद्य
न्ते नराधमाः नराणामधमा नराधमास्तिष्ठन्त्येते च मायया पहृतज्ञानाः सन्तु
षितज्ञाना आसुरं भावं हिंसानृतादिलक्षणमाश्रिताः ये तु न वैरा नमाः सुकृत
कर्माणस्ते चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन आर्तो जिज्ञासुरर्थार्थी ज्ञा
नी च भरतर्षभ चतुर्विधाश्चतुःप्रकारा मां भजन्ते सेवन्ते जनाः सुकृतिनः पुण्यक
र्माणोऽर्जुन आर्तः आर्तः परिगृहीतस्तस्करव्याघ्ररोगादिनाभिभूतस्तु अभिभवप्राप्
तः जिज्ञासुर्भगवतत्त्वं ज्ञातुमिच्छतीति यः अर्थार्थी धनकामो ज्ञानी विष्णोस्तत्त्ववित् भरतर्षभ न
न्निवृत्तिमिच्छतीति शेषः तत्त्वविदिति ज्ञानेन ज्ञानेनात्मतत्त्वसाक्षात्कारमात्राथी मुमुक्षुरित्य
र्थः चतुर्विधानां तेषां सुकृतिनां भगवद्भजनशीलानां न तुल्यत्वमाशंक्याह तेषामिति तस्य विशि
ष्यमानत्वे हेतुमाह प्रियो हीति नित्ययुक्तं तं भगवन्तमात्मनि समाहितचेतसं सर्वत्र यस्मात्तस्मा
द्भगवानेव सारः सोऽहमस्मीत्येकस्मिन्नेव हितो येस्मात्तस्मान्मयि भगवति भक्तिः स्नेहो विशि

ष्टः ज्ञानिनः स एव भगवन्निष्ठ इति भगवत्प्रियत्वं विशिष्टत्वं तस्य कुतः ११०

सर्वविक्रियारहितं यथोक्तानादिसिद्धमायापारवश्यपरिवर्जितं नायोगाज्ज्ञानतो न कदाचिद्
पि तत्त्वबोधसंभावनेत्याशंक्य कथं पुनरिति भगवदेकशरणतया तत्त्वज्ञानद्वारेण मायाति
क्रमः संभवतीति पृष्टिं हरति उच्यते इति कथं दुरत्ययत्वेनेत्यत्र दुरत्ययः स्यादित्यत्राह मामेवेति
प्रधानस्यैव स्वातंत्र्यमायायाः स्वरूपमिति दैवस्येति स्वातंत्र्यं मायायास्तदुपपन्नं हि गुणैर्योतित्वे
हेतुत्वकरोति गुणमयीति अनुभवसिद्धामनाकस्मादपलापमर्हतीत्याह एषेति जगतस्तत्त्व
प्रतिपत्तिप्रतिबंधकतया गुणमयत्वादैव्याः ममेति प्रागुक्तमेव मायायाः स्वैर्यमन्वयविधिरिति

पदार्थैः एभिर्यथोक्तैः सर्वमिदं प्राणिजातं जगन्मोहितं अविवेकतामापादितं सन्ना
भिजानाति मामेभ्यः परमव्ययं यथोक्तेभ्यो गुणेभ्यः परं व्यतिरिक्तं विलक्षणं चाव्य
यं व्ययरहितं जन्मादिसर्वभावविकाररहितमित्यर्थः कथं पुनर्दैवीमेतां त्रिगुणात्मि
कां वैष्णवीं मायामतिक्रामंतीत्युच्यते दैवी ह्येषा गुणमयी मम माया दुरत्यया मा
मेव ये प्रपद्यंते मायामेतां तरंति ते १४ दैवी देवस्य ममेश्वरस्य विष्णोः स्वभावभूता हि य
स्मादेषा यथोक्ता गुणमयी मम माया दुरत्यया दुःखेनात्ययः अतिक्रमणं यस्याः सा
दुरत्यया एवं सति तत्र सर्वधर्मान्परित्यज्य मामेव मायाविनं स्वात्मभूतं सर्वात्मना ये
प्रपद्यंते ते मायामेतां सर्वभूतमोहिनीं तरंति अतिक्रामंति

ते दुरत्ययत्वे विभजते दुःखेनेति मामेवेत्यादिव्याचष्टे तत्रेति तस्मिन्मायारूपे यथोक्ते दुरत्यया
दुरत्यये सतीति यावत् मामेवेत्येवकारेण मायायाः वेद्यकोटिनिवेशाभावो विवक्षितः स
र्वात्मना कर्मानुष्ठानादिव्यवधानमंतरेणेत्यर्थः मायातिक्रमे मोहातिक्रमो भवतीति मत्वा
विशिनष्टि सर्वेति मायानंतरमुक्तमाहमयांतरतिक्रमेपि कथं ... सिद्धिरित्याशं

गी० भा० टी० १११

कस्तर्हि ज्ञानवतः सतिविशेषस्तत्राह ज्ञानी त्विति तमेव विशेषेण प्रमुखं कं प्रकटयति नन्वत
स्मादितरादिना सर्वमात्मानं न पश्यतीत्यपि तस्य तत्त्वं कथं यथोक्तो नित्ययुक्तः स्यादित्याशं
क्याह स्थितः स एव तद्भक्तो रतीति आरोढुमिति आरोहे हेतुरस्ति यत स च ज्ञानीति आरोढुं
नुत्तममेव सत्कटयति मामेवेति उत्कृष्टो व सागरतीर्थं तेनैव विहरतीति ज्ञानीति ज्ञानार्थं सं
स्कारो वासनात नैज्जन्मानि प्रयत्न कर्मानुष्ठानजनिता बुद्धिशुद्धिः तदाश्रयाणामन्तेन्ते
नानाजन्मनामिति यावत् ज्ञानवान् प्राप्तेनेष्ठपि जन्मसु संभावितमित्याशंक्याह अंते

न हि कश्चिन्मद्भक्तः मम वासुदेवस्यातिप्रियो भवति ज्ञानी तस्यार्थेऽतिप्रियो भवतीति वि
शेषः तत्कस्मादित्याह ज्ञानी त्वात्मैव नान्यो मत्त इति मम मतं निश्चयः आस्थि
तः आरोढुं प्रवृत्तः स च ज्ञानी हि यस्मादहमेव भगवान् वासुदेवः नान्योऽस्मीत्येवं यु
क्तात्मा समाहितचित्तः सन् मामेव परं ब्रह्म गन्तव्यमनुत्तमां गतिं गंतुं प्रवृत्त इत्यर्थः
ज्ञानी पुनरपि स्तूयते बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते वासुदेवः सर्वमिति
स महात्मा सुदुर्लभः १९ बहूनां जन्मनां ज्ञानार्थसंस्काराश्रयाणामन्ते समा
प्तौ ज्ञानवान् प्राप्तपरिपाकज्ञानो मां वासुदेवं प्रत्यगात्मानं प्रत्यक्षतः प्रपद्यते कथं वा
सुदेवः सर्वमिति य एवं सर्वात्मानं मां प्रतिपद्यते

ति ज्ञानवतो भगवत्प्राप्तिपर्यन्तं प्रत्यग्दृशा विहितमिति कथमिति यथोक्तज्ञानस्य स्तुतेन नि
दुर्लभत्वं सूचयति य एवमिति महत्सर्वात्मकं आत्मा यस्याहितचित्तः सोऽतिमहात्मा तत्फ
लितमाह अत इति तत्त्ववाक्योपक्रमात् तत्त्वं कथयतीति मनुष्याणामिति किमिति
न हि सर्वेषां प्रत्यगात्मैव भगवानिति यथोक्तं ज्ञानं नोदेतीत्याशंक्याह हृदिति दिनधाय १११

भगवतो ज्ञानिनश्च परस्परं प्रेमास्पदत्वं प्रसिद्धं प्रमाणयति प्रसिद्धं हीति आत्मनो ज्ञानिनः प्रतिप्रियत्वेपि भगवतो वासुदेवस्य कथं तत्प्रतिप्रियत्वमित्याशंक्याह तस्मादिति अहं ज्ञानिनो निरुपाधिकप्रेमास्पदं परमपुरुषार्थत्वेन च गृहीतत्वादित्यर्थः ज्ञानिनोपि भगवतः प्रतिप्रियत्वं शंकते यदीति ज्ञानी चेदत्यर्थमीश्वरस्य प्रियो भवति तर्हि विशेषणसामर्थ्यादितरेषामार्त्तादीनामप्रियत्वं प्राप्तमिति वा शंकते न तर्हीति तेषां भगवतोऽप्रियत्वमत्र न विवक्षितमित्याह नेति अत्यर्थमिति विशेषणस्य तर्हि किं प्रयोजनमिति चेदुच्यते किंतु

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः

१७ तेषां चतुर्णां मध्ये ज्ञानी तत्त्ववित् तत्त्ववित्त्वान्नित्ययुक्तः भवत्येकभक्तिश्चान्यस्य भजनीयस्याभावात् अतः स एकभक्तिर्विशिष्यते विशेषमाधिक्यमापद्यते अतिरिच्यत इत्यर्थः प्रियो हि यस्मादहमात्मा ज्ञानिनः अतः तस्याहमत्यर्थं प्रियः प्रसिद्धं हि लोके आत्मा प्रियो भवतीति तस्माज्ज्ञानिनः आत्मत्वाद्वासुदेवः प्रियो भवतीत्यर्थः स च ज्ञानी मम वासुदेवस्यात्मैवेत्यतो ममात्यर्थं प्रियः नन्वितरेऽपि त्रयो वासुदेवस्य प्रियाः न किं तर्हि उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतं आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिं सर्व एवैते त्रयोऽप्युदारा उत्कृष्टाः मम प्र

गी

हीति सर्वेषां भगवदभिमुखत्वाविशेषेऽपि ज्ञानिनैव तदतिरेकमंगीकृत्य विशेषणमित्याह उदारा इति किं तत्र प्रमाणमित्याशंक्येश्वरज्ञानमित्याह मे मतमिति ज्ञानी त्वात्मैवेत्युक्तं हेतुमाह आस्थित इति सर्वशास्त्रस्य ज्ञानिव्यतिरिक्तविषयत्वमाह त्रयोपीति ज्ञानिव्यतिरिक्ता नो भगवदभिमुखाः प्रायेण ज्ञानाभावापराधाज्जन्मजन्मावेशंति विषय

एकैकं बहूनां योषित्स्थानि कामानित्यादिश्रुतिमाश्रित्य विहितानीति पदद्वयं व्याचष्टे यस्मा
दिति हितानित्येवकं पदमिति पक्षे प्रत्याह हितानीति मुख्यत्वेनेश्वरे भवेत्किमित्युपचारेण कामि
त्वाशङ्क्याह नहीति उत्तरार्धव्याख्याने कामानां हितत्वाभावे हेतुमाह यस्मादिति किञ्च
ये कामिनस्ते न विवेकिनस्तत्तश्चाविवेक एव कत्वा कामानामूनो हितत्वाशङ्केत्याह अविवे

मनस्यर्चितं देवं इच्छन्ति तस्य तस्य कामिनः अचलां स्थिरां श्रद्धां तामेव विदधा
मि स्थिरीकरोमि श्रद्धायेवं एवं वञ्चतः स्वभावतः यो यो देवतातनुं श्रद्धयार्चितुमि
च्छति स तया श्रद्धया युक्तस्तस्याराधनमीहते लभते च ततः कामान्मयैव विहि
तान्हितान् २२ स तया मद्विहितया श्रद्धया युक्तः सन्तस्याः देवतातन्वा आरा
धनमीहते चेष्टते लभते च ततः तस्या आराधिताया देवतातन्वाः कामानी
प्सितान्मयैव परमेश्वरेण सर्वज्ञेन कर्मफलविभागज्ञेन ये विहितान् निर्मितान् ता
न् हि यस्मात्ते भगवता विहिताः कामास्तस्मात्ताननवश्यं लभत इत्यर्थः हितानि
ति पदच्छेदे हितत्वं कामानामुपचरितं कल्प्य नहि कामा हिताः कस्यचित् यस्मा
दन्तवत्साधनं व्यापाराश्चाविवेकिनः कामिनश्च तेऽतः अन्तवत्तु फलं तेषां तद्भव
त्यल्पमेधसां देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि २३ अन्तवद्विनाशि

किं नद्दीति कामानामनेन फलत्वेन हितत्वमाशङ्क्याह अन्तवदिति तेषामविवेकपूर्वकमन्त
वतः प्राज्ञार्थः तुशब्दोऽवधारणार्थः कामफलस्य विनाशित्वे किमिति कामनिष्ठत्वे
जन्तूनामित्याशङ्क्य प्रज्ञामान्द्यादित्याह अल्पेति

कामैर्नानाविधैरपहृतविवेकविज्ञानस्य देवतान्तरनिष्ठत्वमेव भगवद्देवताप्रत्यक्षाभा
वे कारणमित्याह कामैरिति देवतान्तरनिष्ठत्वे हेतुमाह तन्तमिति प्रसिद्धानियमोजपोप
वासप्रदक्षिणनमस्कारादिनियमविशेषाश्रयणे कारणमाह प्रकृत्येति तत्तद्देवताप्र
सादात्कामिनामपि सर्वेश्वरसर्वात्मके वासुदेवे क्रमेण भक्तिर्भविष्यतीत्याशङ्क्याह तेषां

स महात्मा न तत्समोऽन्योऽस्त्यधिको वातः सुदुर्लभः मनुष्याणां सहस्रेष्विति
पूर्वं ग्राप्तेर्वासुदेवः सर्वमिति प्रज्ञो कारणमुच्यते कामैस्तैस्तैर्हृतज्ञा
नाः प्रपद्यन्तेऽन्यदेवताः तं तं नियममास्थाय प्रकृत्या नियताः स्वया २० तैस्तैः
कामैः पुत्रपशुस्वर्गादिविषयैर्हृतज्ञानाः अपहृतविवेकज्ञानाः प्रपद्यन्तेऽन्यदेव
ताः प्राप्नुवन्ति वासुदेवादात्मनः अन्यदेवताः तं तं नियममास्थाय देवता
राधने प्रसिद्धो यो यो नियमः तं तमास्थायाश्रित्य प्रकृत्या स्वभावेन जन्मा स
न्तरार्जितसंस्कारविशेषेण नियता नियमिताः स्वया आत्मीयया तेषां च कामि
नां यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति तस्य तस्याचलां श्रद्धां तामेव वि
दधाम्यहम् २१ यो यः कामी यां यां देवतातनुं श्रद्धया संयुक्तो भक्तः

चेति स्वभावतो जन्मान्तरीयसंस्कारवशादित्यर्थः भगवद्विहितया स्थिरया श्रद्धया सं
स्कारोपीनद्या देवताविशेषमाराधयापि भगवदेव ग्रहादेव फलप्राप्तिरित्याह यो यामि
ति ईहते न वर्जयतीत्यर्थः आराधितदेवताप्रसादात्फलप्राप्तौ किं मोक्षं रेणताशङ्क्य न
स्य सर्वज्ञस्य कर्मफलविभागाभिज्ञस्य देवताधिष्ठात्रन्तरात्मनः स्व वपु लेटान्तेभित्याह सर्व

गी॰ भा॰ टी॰ ७

113

नहिं भगवद्भक्तिरहितयुक्तेस्यादित्याशंक्याह केषांचिदिति सर्वस्य लोकस्य न प्रकाशोहमित्यत्र
हेतुमाह योगेति अनाद्यनिर्वाच्याज्ञानक्लिन्नात् देवमद्विषये लोकस्य मोहो ननु स्वम
हिम्न स्वरूपाविवेकाभावात्प्रतिबद्धत्वाद्धि इत्याह नयेति मायया भगवानावृत इव
स्यादपि लोकस्य वाऽज्ञानप्रतिबन्धः स्यादित्याशंक्याह ययेति नहि योगमायया मायिनो
विज्ञाने प्रतिबध्नाति मायायाः लोकिकमायाविवदित्यर्थः भगवतो मायाप्रतिबद्ध
नाहं प्रकाशः सर्वस्य योगमायासमावृतः मूढोयं नाभिजानाति लोको
मामजमव्ययं २५ नाहं प्रकाशः सर्वस्य लोकस्य केषांचिदेव मद्भक्तानां प्र
काशोहमित्यभिप्रायः योगमायासमावृतः योगो गुणानां युक्तिः घटनं
सैव माया योगमाया तया योगमायया चिन्तसमाधिर्वा योगो भगवत
योगस्तत्कृता माया योगयोगमायया तया समावृतः संछिन्न इत्यर्थः अ
तः मूढः लोको यं नाभिजानाति मामजमव्ययं यया योगमायया समा
वृतं मां लोको नाभिजानाति नासौ योगमाया मदीया सतीममेश्वरस्य
मायाविनो ज्ञाने प्रतिबध्नाति यथा अन्यस्यापि मायाविनो माया न हि तत्
ज्ञानतामावेसर्वज्ञत्वमप्रतिबंधं सिद्धमित्याह यतः इति लोकस्य मायाप्रतिबद्धविज्ञानत्वादे
व भगवदभिमुख्येप्यत्वमित्याह मांतिति कालत्रयपरिच्छिन्नापरिच्छिन्नेसमस्तवस्तुविष
यज्ञाने प्रतिबंधो नास्ति यस्यालोकितयोजनानाद्यनन्तस्य मांतिति लोकस्य भगवद्वतिविज्ञाने प्रतिबंध
योगतयातिनहि तत्त्वतः कर्तिविफलेत्याशंक्याह तस्तत्त्वमिति नहि मद्वीयविज्ञानस्य तद्विद्यासयान्तेनत्या

किं तर्हि साधनमनेन फलायेत्याशङ्क्य भगवद्भक्तिमित्याह मद्भक्ता इति अन्तरार्थं मुक्त्वाप्यो
कस्मात्तत्यार्थमाह एवमिति देवताराधने भगवदाराधने चेति शेषः मामेवेत्यादौ देवता
विशेषश्रवणेनेन फलापत्तिवक्तव्यो उक्तो वैपरीत्यकारणमविवेकात्तिरिक्तं नास्तीत्यभि
प्रेत्याह अहेतुकेति भगवद्भजनस्यानन्तफलतेपि प्रशस्तिनोऽप्रायेण तन्निष्ठताभावे प्रश
ष्टव्ये किंनिमित्तं निवेदयति किमिति निरतमित्यादिना अप्रकाशप्रकाशरूपत्वमपि निषे
धः स्वदृष्टौ लीलाविग्रहावस्थायामित्यर्थः प्रकाशस्य तर्हि कदाचित्तेभगवतेति प्रा

अल्पप्रज्ञानां देवान् देवयजो देवान् यजन्तीति देवयजः ते देवान्यान्ति मद्भक्ता
यान्ति मामपि एवं समानेप्यायासे मामेव न प्रपद्यन्ते न फलायतो हि बालकः एव
तेन इत्यत्र क्रोशोद्दर्शयति भगवान् किंनिमित्तं मामेव न प्रपद्यन्त इत्युच्यते अव्य
क्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः परं भावमजानन्तो ममाव्ययमनुत्तमम् २४
अव्यक्तं सप्रकाशं व्यक्तिमापन्नं प्रकाशं गतमिदानीं मन्यन्ते मां नित्यप्रकाशमहं मामप्र
काशमिमबुद्धयः अविवेकिनः परं भावं परमात्मस्वरूपमजानन्तो विवेकिनः स
माव्ययमव्ययरहितं अनुत्तमं निरतिशयमद्वयं भावमजानन्तो मन्यन्त इत्यर्थः

प्रेनेत्याह नित्यमिति कथं तर्हि भगवन्तमाकलितकप्रकाशं मन्यन्ते तत्राबुद्धयः इत्युक्तं
दृष्टान्तेन परमिति परमनुत्तममिति विशेषणद्वयं सोपाधिक निरुपाधिक भावार्थं
मविवेकरूपमज्ञानं भगवद्विग्रहाधिष्ठितविषयकमुक्तं तस्मिन्नपि निमित्तप्रसङ्गे वेदमनाद्यज्ञा
नरूपमन्यस्यापि तदज्ञानमित्यादिना त्रिभिर्गुणैः मयैरित्यौपाधिकरूपः स्यान्नप्रतिपत्तौ का

गी० भा० एवंभगवदर्पणपूर्वकं सन्न्यासयोगेन फलितमाह शुभेति शुभत्वगात्मन्यहंकारादिप्रतिबंधक
टी० प्रभावेनाज्ञानोत्पत्तेरसम्भवोऽस्तीति शङ्कार्थः फलप्रयुक्तं महेश्वरा स्वरूपज्ञानान्वयुक्तो मैवप
११५ योऽन्ते प्रतिबन्धप्रतिविभागसामर्थ्यमिति शीलनार्थं भागेनपरेनयेति संबोधनं तु यतन ज्ञानप्रति
बंधप्रयुक्तनमवोत्कर्षकारणमुपसंहरति मोहेति जायमानं भजनानां मोहं परंवपूर्वं फलितमा
ह यतइति भगवत्तत्त्ववेदनाभावेन त्रिभुवनवैधुर्यं फलितोऽस्त्याह अग्निवदिति यदि सर्वात्मभू

सीन इति च विरुद्धमुच्यते इति तत्परिहारार्थमाह मयाध्यक्षेण प्रकृतिः
सूयते सचराचरं हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥ १० ॥ मया सर्वतो दृशिमात्रस्वरूपे-
णाविक्रियात्मनाध्यक्षेण मम माया त्रिगुणात्मिका अविद्यालक्षणा प्रकृतिः मा
सूयते उत्पादयति सचराचरं जगत् तथा च मन्त्रवर्णः एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्वभूतान्तरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुण-
ध्य श्चेति हेतुना निमित्तेनानेनाध्यक्षत्वेन कौन्तेय जगत्सचराचरं व्यक्ताव्यक्तात्मकं विपरिवर्तते

ति सर्वेषु भूतेषु सत्तास्फूर्तिप्रदत्वेन संनिधिमात्रेणोच्यते नैकेवलं कर्मण्येवायमध्यक्षो
पि तु तद्धर्माणमपीत्याह साक्षीति द्रष्टृत्वं कर्तृत्वशंकां वारयति चेतेति अद्वितीयत्वं के- २३२
वलत्वं धर्माधर्माद्रहितत्वमाह निर्गुणश्चेति किं बहुना निःशेषविशेषशून्य इति चकारा-
र्थः उदासीनस्यापीश्वरस्य सान्निध्यमात्रेण निमित्तेनैव जगदेतस्योत्पत्तेः प्रवृत्तेर्भृत्यमहाराजवत्

ततस्तेषामुत्पत्तेरीश्वराधीनत्वं भूतस्रष्टृत्वं सृष्ट्यादि त्याशंक्याह पुनर्विनेति तर्हि कीदृशी प्रकृतिस्ता च कथं सृष्ट्वा वृषप्रकाराश्रयत्याशंक्याह एवमिति संसारस्यानादित्वेनानेकधा पुनः पुनर्विसृजतो भूतसमुदायस्याविद्यास्मितादिदोषपरवशत्वेनेत्याह स्वभाववशादिति यदि प्रकृतिं भूतग्रामस्वभावादविद्यादितत्त्वविषमो वैषम्यासिनं हि तव वैषम्यं स्यादिति प्रकृत्यधर्मादिमत्त्वमित्यन्तरीश्वरत्वापत्ते

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकां कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहं

७ सर्वभूतानीति प्रकृतिं त्रिगुणात्मिकां मामकीं मदीयां यान्ति कल्पक्षये प्रलयकाले पुनर्भूतानि भूतानि उत्पत्तिकाले कल्पादौ सर्गादौ विसृजामि उत्पादयाम्यहं एवं च न एवं मम विषमसृष्टौ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ८ प्रकृतिं स्वामात्मीयां मायामवष्टभ्याधिष्ठाय वा विसृजामि पुनः पुनः प्रकृतेर्जातानि भूतग्रामं भूतसमुदायं कर्मवशेनाकृत्स्नं समस्तं अवशं अस्वतन्त्रं अविद्यादिदोषैः परवशं प्रकृतेः प्रकृतेर्वशात् स्वभाववशात् तर्हि तस्यैवं परमेश्वरस्य भूतग्रामं विषमं विदधतस्तव भिन्नाभावाद्धर्माधर्मौ भवेतां स्यादित्यत आह भगवान् न च मां तानि कर्माणि निबध्नन्ति धनञ्जय उदासीनवदासीनमसक्तं तेषु कर्मसु ९ न च मामीश्वरं तानि भूतग्रामस्य विषमसर्गादीनि कर्माणि निबध्नन्ति धनञ्जय तत्र कारणमाह उदासीनवदासीनं यथा उदासीनः उपेक्षकः कश्चिदुदासीनो मानापमानयोर्विक्रियां न भजते तथा फलासङ्गरहितमभिमानवर्जितं इति निर्विकारत्वे नहीति तत्रेति समस्य परमेश्वरस्य तत्संगस्य फलासङ्गाभावात् कर्तृत्वाभिमानाभावाच्च कर्मनिबन्धकत्वं प्रत्युत तत्स्याधिप्रतिदेशमाधर्माधर्मबन्धकारणमित्याह असक्तमिति यदि कर्मसु कर्तृत्वाभिमानो वा कस्यचित्फलासङ्गो वा स्यात्तत्राह असक्तमिति ईश्वरस्य

 जगतः सृष्टिकर्तृत्वेन परमस्येश्वरत्वमाशङ्क्याह तस्मात्तेनानेन सृष्टिकर्तृत्वेनेत्याह कौन्तेयेति नहीश्वरोवि
 विधासृष्टिरस्मास्मादपि वक्ष्यमाणहेतुपपद्यते अन्यस्यावकल्पनाभावादित्याह जगद्विपरिवर्ततइति कथं त
र्हि सृष्टिरित्याशंक्यात्मनाधीनेत्याह दर्शितेति सर्वाध्यक्षः सर्वेश्वरतायुक्तवासनेत्यमुक्त
श्रुत्वेनाहं किमितितामेवात्मत्वेन भेदेन वा सर्वेन भजनेनत्राह एवमिति विपर्ययस्तत्वबुद्धितेभ
गवदवज्ञाया कारणमित्याह मूढा इति भगवतो मनुष्यदेहमेवधामस्मिन्निपर्यासः केमव
तीत्याह मानुषीमिति अस्मदादिवद्देहत्वादात्माभिमाने भगवतो व्यावर्त्तयति मनुष्येति
133 भगवन्तमज्ञानं तामविवेक्तुमलज्ञाने हेतुमाह परमिति ईश्वरावज्ञानात्किं भवतीत्याका

काइहमानवावतत्रतत्राहपातंकतरिपंखिसृष्टिस्थित्यादिमत्ववलोभ्यः दर्शितेच भगवता
भूतानेनानेत्ताने तेनभूतानि जनतंवइति एवमानित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञम
वेजन्तनामात्मानमपि सन्तं अवजानन्ति मां मूढा मानुषीं तनुमाश्रितं परंभावमजा
नन्तो मम भूतमहेश्वरं ११ अवजानन्ति अवज्ञां परिभवं कुर्वन्ति मां मूढा अविवेकिनो
मानुषीं मनुष्यसम्बंधिनीं तनुं देहमाश्रितं मनुष्यदेहेन व्यवहरन्तमित्येतत्परं प्रकृष्टं भा
वं परमात्मतत्वमाकाशकल्पमाकाशादप्यन्तरतमं मनाभिजानन्तो मम भूतमहेश्वरं
सर्वभूतानां महान्तमीश्वरं स्वमात्मानं ततश्च तस्यावज्ञानभावेन हननवराकाः तस्य मम

नायोनवज्ञानशीलवद्भवन्तः पुरुषा भवन्तीत्याह मोघाशाइति भगवदवज्ञानादेवहेतो
रवज्ञानतस्तज्जनितवोवराकाणि च्याः सर्वत्र फलार्थं बाधा मृतिनिरवधः तद्धेतुस्वरूप
ति नमेति तत्र तस्य भगवतोऽज्ञानमज्ञाश्रयणानि इदं नावानस्यभावत्वेपीनः पुनरेतेनत्ता १३३
स्तज्जनितोदिनप्रभावावमतिवस्तुवृहपाः षण्णं भगवतः मज्ञानतास्तु भूर्वकं प्राच्युत
विषादयोनि कथमिति भगवन्निदापराणोनकाचिदपि प्राप्येनार्थवतीत्याह हूंमोदेति ने

कार्यं च कारणं चापि तस्मात्तदधीना प्रकृतिरिति वृत्तेः व्यक्ताव्यक्तात्मकं मित्युक्तं सर्वावस्थासि
त्वनेन सृष्टिस्थितिसंहारा व्यापारः तेन व्याप्तिजगतः सर्गादिभ्यो भिन्ना प्रकृतिः स्वाभाविको
नेश्वराधीनत्वाशंकयाह ततुर्वीति नहि स्वतन्त्राया प्रकृतेर्विनाशः स्वर्गस्य कापि प्रवृत्तिरिति हि शास्त्रा-
र्थः तामेव प्रकृतिं प्रकटाहयति सहस्रमित्यादिना भोगस्य विषयोपालम्भाभावे संभवति नानाविधो
विषयोपलब्धिदृष्टौ प्रति प्रत्यगात्मेति भोगफलमित्यानीकरणाति सर्वात्मति विहितं प्रति
पिण्डाचरणेनित्यमिनः सविकुः विवेत्याह न दृष्टमिति न च विमर्षपूर्वके विज्ञाने विनानुष्ठाने मित्या
ह दृष्टमिति दृश्यत्वाप्रकृतिरिति संबन्धः सा च प्रकृतिः सर्वाहृतमते भेगोक्ते नेवनिर्दिष्टं तेनोपा
ते निगमप्रत्यवगतीतिनश्चवचप्रकृते रवप्रमानेमित्याह ग्रवगत्यवसानेति परस्थाप्यतु तमा
ष्टान्तं कर्मला पक्षे निमित्ताहि जगतः सर्वाप्रकृतिरहं मिदं भोक्तोपष्टामीदं कृत्तेलमिदं
स्वमनुमवामि दुः खमनुभवामि नदृष्टमिदं कर्मणो दृष्टं ज्ञात्वा मित्यादिप्रवगति
निष्ठाप्रवगत्यवसानेवपासाधातु परमेवामनोन्यादृष्टात्रुमतः तमर्थं दृष्टापति
ननुश्च कस्येदं व्यापारः सर्वाधारत्वं तेनैतन्नमात्रस्य परमार्थसतः सर्वभोगानामिश्चरं
यितानास्य चेतनानाति तत्र भोवैभोक्तृत्वमस्याभावात्कि निमित्तेयं प्रवृत्तिरित्यत्र प्रश्न इति
त्रेण जगतो हेतुत्वाप्रमाणमाह योऽस्येति अस्य जगतो योऽध्यक्षो निर्विकारः स परमेश्वरः इहाहुः सो
ऽधिष्ठितो तु विनियरमथैः ईश्वरस्य सान्निध्यमात्रेण स्वभावेस्थितेय ललितमाह कतत्वति किं
निमित्तापरस्य परस्पृष्टिनेनास्य वेश्मागार्थी परस्परपरमार्थतो भोगानभिसंबंधिताना तस्य सर्वसा
क्षिण्यतचेतन्यमात्रतान्तरान्याभोक्ताचेतनानन्तराभावादीश्वरस्यैव बाढं चेतनस्य भोगे वा
नचेष्टाप्रवर्त्तत्तमात्तवधिरोधपतावेवंशयावानस्तुपत्रतिवचनेनाप्युक्तं परस्य मात्मा यानि
वधनेसर्गेनन्यान्वच्छायशेनासक्नरथः परमात्मनोऽविज्ञपवेत्थं निमुदाहरति कोऽद्वेति नास्ति

यदि प्रत्यक्षं अपि ते सर्वे च शब्दः परिणाम

महान्तप्रकृत्योपलक्षितैः गुणैरुपेतमात्मानमेव मामिति अन्यानि तमाश्रित्याह अत इति चित्ताः न
ग्राह्यो बाधारूपेण प्रकृतिविशिष्टेऽपि सर्वमन्यास्मिन्नप्रत्यग्रूपेण परस्मिन्नेवम् नयेषां इति बुद्धि
न्यामाकरोति अनन्यचित्ता इति अज्ञानेनैवानुपपन्नः स्वभावोऽपि मामाहोक्तादानानतः
सेवन्त्याह ज्ञात्वेति अव्ययमविनाशिनं भजन्ते प्रकारेण इति कथमिति तत्प्रकारमाह स-
ततमिति सर्वदैव शुद्धबुद्ध्या स्मरणं कीर्तनं वेदान्तश्रवणं प्रणवजपश्च यतन्तश्च वेदादि
नमस्यन्तो मां प्रतिचेतसा प्रह्वीभवन्तो भक्त्या परेण प्रेम्णा नित्ययुक्ताः सदा संयुक्ताः उपास-
ते पुनः सर्वथा नाभजन्तीति तत्त्वेन मोहमार्गे प्रवृत्ता । महात्मानस्तु मां पार्थ दै-
वीं प्रकृतिमाश्रिताः । भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययं १३ महात्मानस्तु अ-
क्षुद्रचित्ताः मामीश्वरं पार्थ दैवीं देवानां प्रकृतिं शमदमदयाश्रद्धादिलक्षणां मा-
श्रिताः सन्तो भजन्ते सेवन्ते अनन्यमनसोऽनन्यचित्ता ज्ञात्वा मां भूतादिं भूतानां
वियदादीनां प्राणिनां चादिं कारणमव्ययं च । सततं कीर्तयन्तो मां यतन्तश्च दृ-
ढव्रताः । नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते १४ सततं सर्वकालं भगवन्तं ब्र-
ह्मस्वरूपं मां कीर्तयन्तो यतन्तश्च इन्द्रियोपसंहारशमदमदयाहिंसादिधर्मैः प्रयतन्त
दृढव्रताः दृढं स्थिरमचाल्यं व्रतं येषां ते दृढव्रताः नमस्यन्तो मां हृदयेशयमात्मानं भ-
क्त्या नित्ययुक्ताः सन्त उपासते सेवन्ते केन प्रकारेणोपासते इत्यपेक्षायामाह ज्ञानयज्ञेन चाप्य- ९०
न्ये यजन्तो मामुपासते एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् १५ ज्ञानयज्ञेन ज्ञा- १३४
नप्रकारं भेदं दर्शयति विविधस्यापि यज्ञस्येति एकत्वेनेति तत्प्रकारभेदो दर्शितः गणार्थं ओं कमवतार्य इति
उपासते इति इज्यतेऽनेन परमेश्वर इति ज्ञानमेव यज्ञः तेन ज्ञानयज्ञेन ईश्वरो वेदितव्यः एकत्वेनैवाधारेण
देवतान्तरध्यानत्यागं मां विधाय इह चिन्तयन्ति अन्यानामिति एकत्वेनेति यावदात्मानं

134

नित्यनैमित्तिकं वा कर्मानुतिष्ठंति तदनुष्ठानाच्च तेषां प्रार्थना सार्था भविष्यतीत्येत आह तथेति परिभवस्तिरस्करणं एवं ज्ञानमतादृशं तेषामपि ज्ञानस्यार्थो विज्ञानं ततो न ह्यास्य प्रार्थनार्थे वैवमित्याशंक्याह तथा मोघेति तथापि मोक्षकं विवेकं च प्रति तत्प्रार्थना सा फलमित्याशंक्याह विचेतस इति न केवलं नुकूलं विशेषणं वक्तव्यमेव तेषां किं तु वर्त्तमानदेहपातादनंतरं

कथं मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः । राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥ मोघाशा मोघा वृथा आशा ईश्वराद्भिन्नो येषां ते मोघाशाः तथा मोघाकर्माणि यानि चाग्निहोत्रादीनि तेनानुष्ठीयमानानि कर्माणि तानि च तेषां भगवत्प्रतिभवानामस्मत्प्रज्ञानात् मोघान्येव निःफलानि कर्माणि भवंतीति मोघकर्माणः तथा मोघज्ञानाः निःफलविज्ञानाः ज्ञानमपि तेषां निष्फलमेव यस्माद्विचेतसो विगतचेतसो विगतविवेका इत्यतो भवंतीत्यभिप्रायः किं च ते भवंतीति राक्षसीं तामसीं प्रकृतिं स्वभावं आसुरीं राजसीं च प्रकृतिं स्वभावं मोहिनीं मोहकरीं देहात्माभिमानरूपां श्रिता आश्रिताः छिंधि भिंधि पिब खाद परस्वमपहरेत्येवं वदनशीला क्रूरकर्माणो भवंतीत्यर्थः आसुर्या नामैते लोका अंधेन तमसावृ-

ता इति श्रुतेः रूपानिरूपानिश्रितेत्याह किं चेति मोहकरीमिति प्रकृतिरूपविशेष्य स्वाविशेषणं छिंधि भिंधि पिब खादेति प्राणिहिंसारूपो राजसो स्वभावः परद्रव्यस्वभावस्तन्नदेहेन गृहं धिपरस्वमेवापहरेत्यादिरूपः मोहो मिथ्याज्ञानं तदुक्तमेव स्फुटयति छिंधीति केचन भगवंतं भजंते तेनाह केचनेति

गम्यत इति शङ्कां निरस्यन् लयपर्यन्तं फलं गतिरित्याह कर्मेति योग्यायोग्यकर्मफलस्यैव गन्तृणामाकार्यकारण
प्रपंचस्याधिष्ठानमित्याह निवास इति प्राणिनो निवसन्त्यस्मिन्निति अत्यन्तमार्तिमाश्रित्याह शरण
मिति प्रभवत्वस्य जगदुत्पत्तिरत्यन्तमद्धापाने उत्पत्तिरिति कारणस्य कथमुक्तत्वमित्या
शंक्याह यावदिति कारणमन्तरेणापि कार्यं कदाचिदुद्देष्यतीति किं कारणेनेत्याशंक्याह

135

किंच गतिर्भर्त्ता प्रभुः साक्षी निवासः शरणं सुहृत् प्रभवः प्रलयः स्थानं निधा
नं बीजमव्ययं १८ गतिः कर्मफलं भर्त्ता पोष्टा प्रभुः स्वामी साक्षी प्राणिनां कृताकृतस्य
साक्षी निवासः यस्मिन्प्राणिनो निवसन्ति शरणमार्त्तानां प्रपन्नानामार्त्तिहरः सु
हृत्प्रत्युपकारानपेक्षः सन्नुपकारी प्रभवः उत्पत्तिर्जगतः प्रलयः प्रलीयतेऽस्मि
न्निति तथा स्थानं तिष्ठत्यस्मिन्निति निधानं निक्षेपः कालान्तरोपभोग्यं प्रा
णिनां बीजं प्ररोहकारणं प्ररोहधर्मिणां अव्ययं यावत्संसारभावित्वादव्ययं न ह्य
बीजं किंचित्प्ररोहति नित्यं च प्ररोहदर्शनात् बीजसंततिर्न व्येतीति गम्यते किंच
तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन १९
तपाम्यहमादित्यो भूत्वा तपामि कैश्चिद्रश्मिभिरहं वर्षं कैश्चिद्रश्मिभिः उत्सृजा
मि उत्सृज्य च निगृह्णामि

नहीति मा भूत्तर्हि संसारे इष्टापत्तिमेव कदाचित्कार्योत्पत्तिरित्याशंक्याह नित्यं चेति का
रणव्यक्तीनां नानात्वेऽपि गोत्वादिवत् तदन्यतमस्यावश्यंभावित्वात् पूर्वकालस्यानादित्वादिति सिद्धवदित्य १३५
व्यक्तिनाशेऽपि बीजेति उक्तमेव सर्वात्मत्वेन भगवतो विवृद्धिमित्याह किं चेति आदित्यात्मा
यज्ञे हि विचित्रं तिमवष्टभ्य व्याचष्टे कैश्चिदिति

उत्तमाधिकारिणामुपासनमुक्त्वा मध्यमानामधमानां चाधिकारिणामुपासनप्रकारमाह केचि
दिति तेषामेव प्रकारान्तरेणोपासनमनुष्ठीयत इति केचिदिति बहुप्रकारेण सम्यग्देवतादिरूपेणे
ति यावत् भगवदेकत्वेनोपासने तद्धि नास्ति ध्यानोक्तिप्रकारान्तरे संदेहे प्रकारभेदमाहापृथगित्यत्रा
पि भगवतमेव ध्यायन्ति तेन सर्वात्मकत्वादित्याह अन्यत्राह नि ऊतु पत्तकश्च यागरूपोन्ह ऊर्ध्वं दृष्टि
पश्यन्तस्त्वष्टृ श्रोतृइति क्रियाकारकफलजातं भगवद्व्यतिरिक्तं नास्तीति समुदायार्थः इतश्च भगव

[illegible]

तत्त्वज्ञानमेकत्वेनैकमेव परं ब्रह्मेति परमार्थदर्शनेन यज्ञेनोपासते केचित्तथैवेत्यादि
न्यं च बुद्ध्यादिभेदेन स एव भगवान् विष्णुरवस्थित इत्युपासते केचिद्बहुधावस्थितः स एव भ
गवान्सर्वतोमुखो विश्वतोमुखो विश्वरूप इति तेन विश्वरूपेण सर्वतोमुखेन बहुधा बहुप्रकारेण
पासते पृथग्बहुभिः प्रकारैरुपासनेकत्वमेवोपासनेऽत्यन्तमाह अहं क्रतुरहं यज्ञः स्व
धाहमहमौषधं मन्त्रोहमहमेवाज्यमहमग्निरहं हुतं १६ अहं क्रतुः श्रौतकर्मभेदोहमेव यज्ञो
हं यज्ञः स्मार्तः कर्म किंच स्वधान्नमहं पितृभ्यो दीयमानमहमौषधं सर्वप्राणिभिर्
द्यते तदौषधं व्रीहियवादिसाधारणमथवा स्वधेति भेषजं साधारणं
मन्त्रोहमिति याज्यापुरोनुवाक्यादिर्मन्त्रोहं येन पितृभ्यो देवताभ्यश्च हविर्दीयते अहं
मेवाज्यं हविश्चाहमग्निर्यस्मिन्हूयते सोग्निरहं हुतं तदहं चैतत्कर्म च किंच पिताहमस्य
जगतो माता धाता पितामहः वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च १७ पिताहं ज
नयिता अहमस्य जगतो माता जनयित्री धाता कर्मफलप्रदाता विधाता पितामहः पितुः पिता

[illegible]

न सर्वात्मकत्वमन्तर्गतमित्याह किंचेति पवित्रं पावनमेतेनेति ध्युत्पत्त्या पवित्रं ॐकारश्च
एकमित्याह पावनमिति वेदनं ज्ञानं वेद्यं ज्ञेयं वेदनसाधनमोंकार इति तदुपमाणमित्यादि च
कारादथर्वाङ्गिरसोपदृष्टास्ते भगवतः सर्वात्मत्वे हेतुमाह किंचेति

शुद्धकिल्बिषा निरस्तपापाः सन्त इत्यावहन् नहि स्वर्गप्राप्तिरिति भगवत्प्राप्तिरित्याशंक्याह ते
न मितेति पुण्यं स्वर्गप्राप्तिहेतोरिति यावत् शुभिद्धार्थो हि शक्रः । अपारण्णं हि शक्रादीनां वेदत्रयीविहि
तानां धर्माणां समाहारः इति धर्मं मत्तेदेवत्रैधर्म्यं नष्टं तु प्रपन्नाः कृत्स्नगतागतमिति यावत् कामकामा
गमनागमने ह्राराकामितं तत्फलं शाश्वद्युष्टिप्रसंवेष्टितमित्याशंक्याह गतेति फलमत
मिति यावत्तामेवाराधयन्तो मामपश्यन्नितिष्ठानां सन्तो निष्कामा लोकंपि योगं तेमां स्वानाम
त्याशंक्याह येषु नवीति तेषां योगक्षेमं वहामीत्युवत्रयं संबंधः । येऽन्यासनो न विद्यन्त इति व्युत्पत्ति

136

पूतपापाः शुद्धकिल्बिषाः यज्ञैरग्निष्टोमादिभिर्विहितात्मस्वभावैर्स्वर्गतिं प्रार्थयन्ते स्वर्ग
गमनं स्वर्गतिः तां स्वर्गतिं ते लोका ते ते च पुण्यं पुण्यफलं मासाद्य प्राप्य सुरेन्द्र
लोकं शतक्रतोः स्थानं प्राप्नुवन्ति दिव्यान् दिवि भवान् दैवान् देवभोगान् देवा
नां भोगान् देवभोगान् ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति
एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते २१ ते तं भुक्त्वा स्वर्गलोकं विशालं
तो विविशालोऽण्णं तो णे पुण्ये मर्त्यलोकमिमं विशन्त्या विशन्ति एवं हि यथोक्तेन प्रकारेण त्र
यीधर्मं केवलं वैदिकं कर्मानुप्रपन्ना गतागतं गतं चागतं च गमनागमनं कामकामाः
कामान् कामयन्त इति कामकामा लभन्ते गतागतमेव न तु स्वातन्त्र्यं क्वचिल्लभन्त इत्यर्थः
येषु नवीः कामाः सम्यग्दर्शिनः । अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते तेषां नित्या
माभियुक्त्याह इणाशीति कार्यमेवकारणेनादोस्य ब्रह्मावबुध्यन्ति परमिति सहमेववासुदेवः स
र्वात्मा न मत्तोऽन्यत्किंचिदस्तीति ज्ञानतो मे वृथक् शब्दोधार्यन्त इत्याह चिन्तयन्तो मां शाके
तान्यात्मवर्णं भुक्त्वा अनधिकारिणां निदिशन्ति सन्यासिन इति पर्युपासते परितः सर्वतोऽवे
बाधितत्वेन पापपत्नीत्यर्थः । नित्याभियुक्तानां नित्यमनवरतमाप्रेरणध्याने व्याहतानामि १३६

वर्षोत्सर्गनिग्रहावेककर्तृकावेकस्मिन्काले विरुद्धावित्याशंक्याह अष्टभिरिति कालभेदेन वर्षस्य
निग्रहोत्सर्गावेककर्तृकावविरुद्धावित्यर्थः यस्य कारणस्य संबंधेन यत्कार्यमभि
व्यज्यते न हि स्फटिकस्य च्यतेकारणसंबंधेनानभिव्यक्तं कार्यमेवाभिव्यक्तं नामरूपम
सदिति च्यवह्रियते तेनैतदाह सदिति शून्यवादं निरस्यति नपुनरिति भगवतोऽनन्यत्वात्सदे
कार्यकारणकल्पनानिषेधप्रसंगान्नेति षेदित्यर्थः नहि पृथक्सत्त्वं कार्यसत्त्वे कारण
स्य चासत्त्वमात्रस्य पालित्याशंक्य वाशब्देन निषेधति कार्यमिति नहि कार्यस्यात्यंतिकं सत्त्व
वाचारंभणश्रुतेर्नापि नरशृंगवदात्यंतिकमसत्त्वं नस्तवत्वेनावलिन्त्वादृष्टत्वेनेत्यर्थः उक्तो

कैश्चिद्रश्मिभिरष्टभिर्मासैः पुनरुत्सृजामि प्रावृषि अमृतं चैव देवतानां मृत्यु
श्च मर्त्यानामसच्च सर्वेषां नपावेद्यमानं नहि परीतस्य सदसच्चाहमर्जुन न पुनरत्य
न्तमेवासन्भगवान्स्थूलकार्यकारणे वा सदसती ये पूर्वोक्ताः निष्कामनिष्ठप्र
कारेणैकत्वपृथक्त्वादिविज्ञानेन यज्ञैर्मां यजन्त उपासते ते ज्ञानिनो विदस्ते यथा वेदा
नं मामेव प्राप्नुवन्ति ये पुनः सकामाः कामकामाः त्रैविद्या मां सोमपाः पूतपापा यज्ञै
रिष्ट्वा स्वर्गतिं प्रार्थयन्ते ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगा
न् २० त्रैविद्याः ऋग्यजुःसामविदः याज्ञिकाः वस्वादिदेवरूपिणं मां सोमपि

तीन्यज्ञैर्भगवदभिध्यानेऽभिनिविष्टबुद्धीनां किं फलमित्याशंक्याह सद्यो वा क्रमेण वा
मुक्तिरित्याह येऽपीति भगवद्भक्तानामपि निष्कामानामेव मुक्तिरिति दर्शयितुं सका
मानां पुनः संसारमवतारयति ये पुनरिति तिस्रो विद्या अधीयते विदन्तीति वा त्रैवि
द्यावेदविदस्तदाह ऋगिति वस्वादीनादिशब्देन सवनत्रयेण नामाद्यादित्यान्तरूपाश्च

गी. भा. इति प्राप्तौ विशेषणार्थेन संबध्यते ननु हे वा आत्मना परस्यैवात्मनः स्थितत्वमुपगमात् देवतान्तरप्रार
टी. ब्धानामपि भगवद्धारणाविशेषात् अनेकत्वमुक्तिं वितरेदिति मत्वा नः शङ्कते नन्विति
९।२२ उक्तमर्थमङ्गीकृत्य परिहरति सत्यमित्यादिना देवतान्तरयाजिनां भगवद्याजिभ्यो विशेषमाह
अविधीति तद्व्याकरोति अविधिरिति नन्वेवस्वात्मैपत्तादिज्ञानपूर्वकमेव तद्भक्तास्त्वद्याजिनो भ

137 अतो भगवानेव तेषां योगक्षेमं वहतीति ननु अन्या अपि देवतास्त्वमेव चेत् तद्भक्तास्त्वामेव
यजन्ते सत्यमेव येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः । तेऽपि मामेव कौन्तेय यजन्त्य
विधिपूर्वकं २३ येऽप्यन्यदेवताभक्ता अन्यासु देवतासु भक्ता अन्यदेवताभक्ताः
सन्तो यजन्ते पूजयन्ते श्रद्धया आस्तिक्यबुद्ध्या अन्विता अनुगताः तेऽपि मामेव कौन्तेय
यजन्त्यविधिपूर्वकं अविधिरज्ञानं तत्पूर्वकं अज्ञानपूर्वकं यजन्त इत्यर्थः कस्मात्
अविधिपूर्वकं यजन्ते इत्युच्यते यस्मात् अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च । न
तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते २४ अहं हि सर्वयज्ञानां श्रौतानां स्मार्तानां
च सर्वेषां यज्ञानां देवतात्मत्वेन भोक्ता च प्रभुरेव च

वन्तीति कथमविधिपूर्वकं तेषां यजनमिति शङ्कते कस्मादिति देवतान्तरयाजिनां यजन
मविधिपूर्वकमित्यत्र हेत्वर्थं तेन श्लोकमुत्थापयति उच्यत इति सर्वेषां हि विहितानां यज्ञा १३२
नां वस्त्वादिदेवतात्वेनाहमेव भोक्ता स्वेनान्तर्यामिरूपेण च प्रभुश्चाहमेवेति प्रसिद्धमेतदिति
हिशब्दार्थः प्रभुरेव चेत्युक्तं विवृणोति मत्स्वामिको हीति

योगक्षेमस्य योगक्षेमेनान्तरीयकत्वं पुनरुक्तमर्थमाह योगेति किमिति परमार्थदर्शिनां योगक्षे
मं वहसीत्याशङ्क्याह ज्ञानी त्विति तुल्यं तेषां योगक्षेमं वहामीति संबन्धः सम्यग्दर्शननिष्ठाना
मेव योगक्षेमं वहति भगवानिति विशेषणसामर्थ्यमाणः शङ्कते नन्विति अन्येषामपि भक्ताना
च भगवान् योगक्षेमं वहतीत्येतदङ्गीकरोति सत्यमिति नहि भक्तेषु ज्ञानिषु च विशेषो नास्तीति

अपृथग्भूताः परं देवं नारायणमात्मत्वेन गताः सन्तः चिन्तयन्तो मां ये जनाः सं
न्यासिनः पर्युपासते तेषां परमार्थदर्शिनां नित्याभियुक्तानां सतताभियोगिनां
योगक्षेमं योगोऽप्राप्तस्य प्रापणं क्षेमः तद्रक्षणं तदुभयं वहामि प्रापयाम्यहं ज्ञा
नी त्वात्मैव मे मतं स च मम प्रियो यस्मात्तस्मात्ते ममात्मभूताः प्रिया इति ननु अन्ये
षामपि भक्तानां योगक्षेमं वहत्येव भगवान् सत्यमेवं वहत्येव भगवान् किं त्वयं विशे
षो ये अन्ये भक्तास्ते आत्मार्थं स्वयमपि योगक्षेममीहन्ते अनन्यदर्शिनस्तु नात्मा
र्थं योगक्षेममीहन्ते न हि ते जीविते मरणे वा आत्मनो गृद्धिं कुर्वन्ति केवलमेव भग
वच्छरणास्ते

इत्याह किं त्विति तं विशेषं प्रतिज्ञापूर्वकं विवृणोति अन्ये इत्यादिना योगक्षेमबुद्धि
पूर्वकं स्वयमीहन्ते चेष्टन्ते कुर्वन्तीति यावत् आत्मविदां स्वार्थं योगक्षेमबुद्धिपूर्वचेष्टाभावं स्प
ष्टयति नहीति गृद्धिं तृष्णां कामनां तामित्येतत् ज्ञानिनां तर्हि सर्वज्ञानाशो न स्यादित्याशङ्क्याह
केवलमिति तेषां तदेकशरणत्वे फलितमाह अत इति

भगवदाराधनस्य सुकरत्वमेव प्रसङ्गपूर्वकं प्रपंचयति कथमित्यादिना पत्रपुष्पादिकं भक्त्या एवं के
मदर्थमर्पितं तेनेनापि तुष्टश्चेतास्तपस्विनो मामाराधयतोऽन्यदहमवधारयामीत्याह पत्रमित्यादिना
तदाराधनस्य सुकरत्वेन तदेवावश्यकमित्याह यत इति मुनेः प्रासादान्तेऽपि गमनादीति पाव
तपदश्नासि यत्किंचिद्भोगभुक्त्याहवनस्य सतत्त्वं वारयति श्रोतमिति मत्समर्पणेन तत्सर्वं मदात्मस

न केवलं मद्भक्तानामनावृत्तिलक्षणमनन्तफलं मदाराधनसुखं चाह कथं पत्रं पुष्पं फलं
तोयं यो मे भक्त्या प्रयच्छति तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः २६ पत्रपुष्पफलतो
यादिकं यो मे मह्यं भक्त्या प्रयच्छति तदहं भक्त्युपहृतं पत्रादि भक्त्या एवं केवलं प्रीतिभक्त्या उप
हृतं तेनाश्नामि गृह्णामि प्रयतात्मनः शुद्धबुद्धेः यत एवमतः यत्करोषि यदश्नासि यज्जुहो
षि ददासि यत् यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् २७ यत्करोषि यदाचरसि स्वभावतो
यत्कर्म स्वतः प्राप्नुयदश्नासि यज्जुहोषि हवनं निर्वर्त्तयसि श्रौतं स्मार्तं वा यद्ददासि प्र
यच्छसि ब्राह्मणादिभ्यो हिरण्यवस्त्रादीनि यत्तपस्यसि तपश्चरसि कौन्तेय तत्कुरुष्व म
दर्पणं मदर्पणं एवं कुर्वतः तव यद्भवति तच्छृणु शुभाशुभफलैरेवं मोक्ष्यसे कर्मब
न्धनैः संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि २८ शुभाशुभफलैः शुभाशुभे
इष्टानिष्टे फले येषां तानि शुभाशुभफलानि कर्माणि तैः शुभाशुभफलैः कर्मबन्ध
नैः कर्मात्मकबन्धनानि तैः कर्मबन्धनैः एवं मत्समर्पणं कुर्वन्मोक्ष्यसे

मोक्ष्ययोग्यः किं मोक्षो भवतीति तदाह एवमिति भगवदर्पणबुद्ध्या सर्वं कर्म कुर्वतो जीवं
न्मुक्तस्य प्रारब्धकर्मावसाने विदेहकैवल्यमावश्यकमित्याह शुभेत्यादिना भगवदर्पण
करणान्तर्मुक्तिः संन्यासयोगाख्येति साधनद्वयमाप्ताविव्याख्यान यति सोऽपीमिति

तत्र एवं ध्यायतामनेवाभ्यां प्रमापणूत्यायिपत्तोहमिति तथापि देवतांतरयाजिनां यजनमविधिपू
र्वकमिति कृतः सिद्धं तत्राह तथेति मामेव यजंतु मोक्षं तेषां भवेन मत्तोनिपावत् तथा मोक्षं प्र
मो मां वस्त्वते तेन मोक्षं तेन प्रभुत्वेन च मां यथावद्यतेन जानंत्यतो मोक्षं वादिनामसाजानान्तम
यान्यपि तत्कर्मणः श्रावेतेक मफलादित्याह अतश्चेति यद्यन्यदेवताभक्ता भगवन्नताज्ञानात्कर्म
फलात्स्युरेवं ते तर्हि तेषां देवतायजनमकिंचित्करमित्याशंक्याह येपीति देवतांतरयाजिनाम
नात्तु स्थिफलाभावेपि तत्तद्देवतायागात्तद्रूपफलप्राप्तिर्भवत्यात्तत्र किंचित्करमित्यर्थः देवता

मत्स्वामिको हि यज्ञः अपि यज्ञोहमेवात्रेत्युक्ते तथा न तु मामभिजानंति तत्त्वेन यथाव
त् अतश्च्यावितिप एवं कथमिष्टा यागफलात् च्यवंति च्यवंतीति येप्यन्यदेवताभक्ता मत्ते
नाविधिपूर्वकं यजंते ते नेवामोपि यागफलमेवावश्यमविष्यति कथं यांति देवव्रता देवान्
पितॄन्यांति पितृव्रताः भूतानि यांति भूतेज्या यांति मद्याजिनोपि मां २५ यांति गच्छंति
देवव्रताः देवेषु व्रतं नियमो भक्तिश्च येषां ते देवव्रता देवान्यांति पितॄनग्निष्वात्तादीन्यां
ति पितृव्रताः श्राद्धादिक्रियापराः पितृभक्ताः भूतानि विनायकमातृगणचतुर्भ
गिन्यादीनि यांति भूतेज्या भूतानां पूजका यांति मद्याजिनोपि मां मद्यजनशीला वैष्णवाः
मामेव समानेप्यायासे मामेव न भजंते अज्ञानात्तेनैतेल्पफलभाजो भवंतीत्यर्थः

रयाजिनामावश्यकं तत्फलमाशंक्याह एवं कमुदाहरति कथमित्यादिना नियमोवल्पपकारश्च
दतत्प्रश्नाभावाद्देवतांतराराधनस्यानवच्छिन्नफलत्वं भक्ता भगवदाराधनस्यानंतफलत्वमा
ह यांति मद्याजिनामयजनशीला वैष्णवा मामेव भगवदाराधनस्यानंतफलत्वे देवतांतराराधने
मुक्ता भगवदाराधनमेव युक्तं मापारस्साम्यात्फलातिरेकाद्युक्त्याशंक्याह समानेपीति अत्ता
न नाथोनेन देवतांतराराधनवताफलतो [illegible] न्यूनत्वादपि येते नेनेति अनंतफलत्वाद्भगवता
राधनमेव केवलमित्युक्ते सकरुणो ब्रूते त्याह केवलोमातेति

गी·भा·
टी·
१३९

दुराचारोऽदुराचारादुपरमः किमिति तद्भक्तस्य दुराचारादुपरतिर्न च्यते दुराचारोऽपहतपाप्मा किमिति श्रेयान् चेत्तत्रोत्याशंक्याह अपि चेदिति अतएव भगवद्भक्तिर्विधातव्येत्याह किंचेति न मे भक्तः प्रणश्यतीति यत्नेन हतमाचक्षाणो भक्तानिष्टकारिजातिनियमो नास्तीत्याह मां हीति ये पि स्युः पापयोनयः पापाचारस्त्वतद्भक्ता परां गतिं गच्छन्ति । तर्हि किं सर्वमजातिनिमित्तेन संन्यासादिना किं वा सहृद्गृहेनेत्याशंक्याह

गृणन्मद्भक्तो माहात्म्यं अपि चेत्सुदुराचारो भजते मामनन्यभाक् साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ३० अपि चेद्यद्यपि सुष्ठु दुराचारः सुदुराचारः अतीवकुत्सिताचारः मामपि भजतेऽनन्यभाक् अनन्यभक्तः सन् साधुरेव सम्यग्वृत्त एव स मन्तव्यो ज्ञातव्यः सम्यक् यथावत् व्यवसितः हि यस्मात् साधुनिश्चयः सन्त्यज्य च बाह्यदुराचारतामन्तः सम्यग्व्यवसायसामर्थ्यात् क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ३१ क्षिप्रं शीघ्रमेव भवति धर्मात्मा धर्मचित्तः एवं शश्वन्नित्यं शान्तिं चोपशमं निगच्छति प्राप्नोति शृणु परमार्थं कौन्तेय प्रतिजानीहि निश्चितार्थं प्रतिज्ञां कुरु न मे मम भक्तो मयि समर्पितान्तरात्मा मद्भक्तो न प्रणश्यतीति किंच मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिं ३२ मां हि यस्मात् पार्थ व्यपाश्रित्य मामाश्रयत्वेन गृहीत्वा येऽपि स्युः भवेयुः पापयोनयः पापा योनिर्येषां ते पापयोनयः पापजन्मानः के ते इत्याह स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति गच्छन्ति परां प्रकृष्टां गतिं

किं पुनरिति उत्तमजातिमतां ब्राह्मणादीनामति प्रायेण परां गतिः ... लभ्यत इतो भगवद्भजनं तैरेकान्तेन विधातव्यमित्याह यत इति मनुष्यदेहातिरिक्तेषु पश्वादिदेहेषु भगवद्भजनेन पात्रताभावात् प्राप्तमनुष्यत्वे भगवद्भजनेन प्रयतितव्यमित्याह दुर्लभमिति भगवद्भक्तेर्नित्यभाव इत्युक्ते कथमिति ईश्वरसेवायामिति कर्तव्यतां दर्शयति १३९

139

भगवतो रागद्वेषवत्त्वेनानीश्वरत्वमाशंक्य परिहरति रागेत्यादिना नहिं भगवद्भजनमं किंचित्का
रमित्याशंक्याह अग्निवदिति न स्वपंचपाति एवमेति भक्तानभक्तांश्चानुगृह्णातीनानुगृह्णातश्च भ
गवतो न कश्चन रागादिमत्त्वमित्याशंक्याह ये भजन्तीति एवं सत्यमादिधर्मैर्मां भजन्ति ते ते नैव जने
नाचिरमाहात्म्येन पीयूषहृदये यो मयि मत्समीपे वर्तन्ते इति मद्रूपमिव्याप्ति योग्यांश्चिन्नाभवन्ति तथा
तृप्तं विशेषस्यं तेनार्थः तेषु च मत्समीपे स्मत्तमहमपि तस्य भावतो वर्तमानस्तत्वनुग्रहं करोमि वा
मिपथ्याच्यापकमपि समावितेजे सत्त्वरूपेण तत्प्रतिफलितेन तथा परमेश्वरो वर्जनो यत्र यामी
मोपेमन्यास योगो नाम संन्यासश्रामी मत्तमपेत्य नपाक मेतायोगस्यासाविति तेनस
न्यासयोगेन युक्तः श्वात्मा तस्य रागलयस्तु नवस्तत्संन्यास योगयुक्तात्मा सन् विमुक्तो क मेव
धने ज्ञानी वैवापाति तेषां रो रमो ममुपय्याम श्रागामि व्यामि रागद्वेषवान्सोहि भगवान्स्यतोभ
क्ता न्यवानुगृह्णाति वेत तत्राने तितत्र समोहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः समोहंस
मत्तस्याहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः अग्निवदहं यथा दूरस्थानामग्निर्शी
तं नापनयति समीपस्थस्य पैतांशीतमपनयति तथाहं भक्तानुगृह्णामि ते तराग
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहं मत्तस्य भावतः एव वर्तनमन्तरा तेन मि ते मयि वर्त्तन्ते तेषु
चाप्यहं स्वभावत एव वर्तेन न तत्र शेषु तेताव तान्तेषु द्वेषो मम ॥२९॥ [illegible]
निरस्तसमस्तकल्मषस्तेषु पुरुषेषु सन्निधत्ते देवी प्रकृतिः सा आश्रिता मां भजतोनुक्तत्वादिस्य
र्थः प्रकृतो भगवद्भक्तिस्तवत पापीयसामपि तत्राधिकारो स्तीति स्वच्यपति अपि चेति स
म्यग्व्रतमेव भगवद्भक्तोज्ञानतव्यादन्यत्र हेतुमाह सम्यगिति हेतवमेवप्रपंचयन्मुस्मजेति
भगवन्तं भजमानस्य कथं दुराचारतापरित्यक्ताभवतीत्याशंक्याह क्षिप्रमिति सतिदुराचा
रेकपापधर्मे चित्तत्वेनेत्याह प्राप्तादिति

भ [illegible]

गी॰भा॰ टी॰ १४०

वक्तव्याः सविशेषध्याने निर्विशेषश्रुतिप्रज्ञा च शेषत्वेनेति भावः ननु सविशेषे निर्विशेषे च
भगवतो रूपं प्रागेव तत्रतत्रोक्तं तत्किमिति पुनरुच्यते तत्राह उक्तमपीति यद्यपि तत्र तत्र त
त्वमुक्तं तथापि पुनर्वक्तव्यं दुर्विज्ञेयत्वादित्यतो नाम न्यूनता तदुक्तिप्रयोजनं प्रकृष्टत्वं वचसः प्र
श्रुणोति निरतिशयमिति तदेव वचो विशिनष्टि परममिति सकृदुक्तेऽप्यर्थे पुनरुक्तिरे
नर्थिकेत्याशंक्याह प्रीयमाणायेति तेन वक्ष्यामीति तत्स्यमिति पूर्वेण संबंधः हितेऽ

अध्यायेदानीं येषुयेषु च भावेषु चिंत्यो भगवांस्ते ते भावा वक्तव्याः तत्त्वं च भगवतो
वक्तव्यं उक्तमपि दुर्विज्ञेयत्वादित्यतो भगवानुवाच भूय एव महाबाहो शृ
णु मे परमं वचः यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया १ भूय एव भूयः
पुनः हे महाबाहो शृणु मे मदीयं परमं प्रकृष्टं निरतिशयवस्तुनः प्रकाशकत्वात्
यद्वचो वाक्यं यत्परमं ते तुभ्यं प्रीयमाणाय मद्वचनात्प्रीयसे त्वमतीवामृत
मिव पिबन् ततो वक्ष्यामि हितकाम्यया हितेच्छया किमर्थमहं वक्ष्यामीत्य
त आह न मे विदुः सुरगणाः प्रभवं न महर्षयः अहमादिर्हि देवानां महर्षी
णां च सर्वशः २ न मे विदुर्न जानन्ति सुरगणाः इंद्रादयः किं ते न विदुः मम प्रभ
वं प्रभावं प्रभुशक्त्यतिशयं अथवा प्रभवनं प्रभवः उत्पत्तिं नापि महर्षयो भृग्वादयो
विदुः

140

विज्ञेयतत्त्वज्ञाने कश्चिदन्योऽपि परमं वचो मह्यं वक्ष्यतीति तेन च मम तत्त्वज्ञानं भविष्यतीत्य १४०
तो भगवद्वचनमकिंचित्करमिति शंकित्वा परिहरति किमर्थमित्यादिना इंद्रादयो
भृग्वादयश्च भगवत्प्रभावं न विदंतीत्यत्र प्रश्नपूर्वकं हेतुमाह कस्मादिति

मन्मना इत्येवं भगवद्भक्तं भजमानस्य किं स्यादित्याशंक्याह मामेवेति समाधाय भगवत्येवेति
शेषः एवमात्मानमित्यनेन द्विश्रुतोऽस्ति अहं हीति अहमेव परमयनं तदेति मत्परायणः तथा
भूतः सन्मामेवात्मानमेष्यसीति संबंधः तदेवं मध्यमानां योग्यनिरूप्य नवमेनाध्यमाना
माराधनाभिधानमुखेन निजेन पारमार्थिकेन रूपेणाभ्यस्तेनेत्तानेन परमेश्वरस्य परमारा
धनमित्यभिदधता सोपाधिके तत्पदवाच्यो निरुपाधिके च तत्पदलक्ष्यो व्याख्यात इति

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा अनित्यमसुखं लोकमिमं प्राप्य भ
जस्व माम् ३३ किं पुनर्ब्राह्मणाः पुण्याः पुण्ययोनयः भक्ता राजर्षयस्तथा राजान
श्च ते ऋषयश्चेति राजर्षयः यत एवमतोऽनित्यं क्षणभंगुरमसुखं सुखवर्जितं लोक
मिमं मनुष्यलोकं प्राप्य पुरुषार्थसाधनं दुर्लभं मनुष्यत्वं लब्ध्वा भजस्व मां सेव
स्व कथं मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्यसि युक्त्वैवमात्मा
नं मत्परायणः ३४ मन्मना मयि मनो यस्य स त्वं मन्मना भव तथा मद्भक्तो
भव मद्याजी मद्यजनशीलो भव मामेव च नमस्कुरु मामीश्वरमेष्यसि यागेन
एवं युक्त्वा समाधाय चित्तमेवमात्मानं मां अहं हि सर्वेषां भूतानामात्मा परा गतिः
अतस्त्वं मत्परायणः सन्मामेवं भूतमेष्यसीत्यतीतेन पदेन संबंधः मत्परायणः संसारात्
परमपदं तां मामेवं भूतमेष्यसीत्यत्तोनेन पदेन संबंधः मत्परायणः संसारान्निर्मुक्तः
इति परमहंसपरिव्राजकाचार्यपूज्यपादशंकरभगवतः कृतौ गीताव्याख्याने नवमोऽध्या
यः ९ सप्तमेऽध्याये भगवतस्तत्त्वं विभूतयश्च प्रकाशिता नवमे च
इति श्रीगीताभाष्यटीकायां नवमोऽध्यायः अध्यायद्वयेऽपि सिद्धं सप्तमे सत्योपतो ऽयं आपन्नेऽस्मिन्सप्तमे
ऽध्याये भगवतस्तत्त्वं विभूतयश्च प्रकाशिता नवमे च इति तत्त्वे सोपाधिके निरुपाधिके च तत्त्वे वि
भूतयः सविशेषा निर्दिष्टा वृत्त्याद्युपपत्तिपदार्थोऽस्मिन्नुत्तराध्यायस्याध्यायद्वयेन संबंधः

[illegible]

नानाविधत्वे हेतुमाह स्वकर्मेति कथंचिदपि तेषामात्मातिरेकेणाभावान्मत्त एवेत्युक्तं नैव व
लेन भगवतः सर्वप्रकृतित्वमेव विवक्षितं किं तु सर्वज्ञत्वसर्वेश्वरत्वरूपमपि विशिष्टत्वमपीत्याह किंचेति आद्या भृ
ग्वादयो वसिष्ठान्ताः सप्तसंख्याविशिष्टाः स्वायम्भुवप्रवर्तकाः तथेति मन्वन्तराणामपि पूर्वत्वेनातीतत्वमनुकृ
ष्यते केते मनव इत्यत आह सावर्णा इति प्रसिद्धाः पुराणेषु प्रजानां पालकाः स्वयमीश्वराश्चेति श्री

तद्वन्तं बुद्धिमानिति हि वदन्तीति ज्ञानमात्मादिपदार्थानामवबोधः असंमोहः प्रत्युत्प
न्नेषु बोद्धव्येषु विवेकपूर्विका प्रवृत्तिः क्षमा आक्रुष्टस्य ताडितस्य वा अविकृतचित्तता स
त्यं यथादृष्टस्य यथाश्रुतस्य चात्मानुभवस्य परबुद्धिसंक्रान्तये तथैवोच्चार्यमाणा वा
क् सत्यमुच्यते दमो बाह्येन्द्रियोपशमः शमोन्तःकरणस्योपशमः सुखमाह्लादः दुःखं
संतापः भव उद्भवः अभावस्तद्विपर्ययः भयं च त्रासः अभयमेव च तद्विपरीतं च अहिंसा
समता तुष्टिः तपो दानं यशो यशः भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ५ अ
हिंसा प्राणिनामपीडा समता समचित्तता तुष्टिः संतोषः पर्याप्तबुद्धिर्लाभेषु तपइ
न्द्रियसंयमपूर्वकं शरीरपीडनं दानं यथाशक्ति संविभागः यशो धर्मनिमित्ता कीर्तिः
अयशोऽधर्मनिमित्ताकीर्तिः भवन्ति भावा यथोक्ता बुद्ध्यादयो भूतानां प्राणिनाम्
मत्त एवेश्वरात्पृथग्विधा नानाविधाः स्वकर्मानुरूपेण किंच

६: महर्षीणां च मनूनां च तत्त्वविशेषणानि तेचेति मयि सर्वज्ञे सर्वेश्वरे गता भावना येषां ते तथा
भावनाफलमाह वैष्णवेनेति वैष्णवमैश्वरं ज्ञानाधिष्ठितत्वेन ज्ञानैश्वर्यवत्त्वं सामर्थ्यं तेषां जन्म
नावैशिष्ट्यमाचष्टे मानसा इति मन्वादीनेव विशिनष्टि येषामिति येषां जन्मना चेतनानि
सृष्टा मन्वादीनामस्मिँल्लोके सर्वाः प्रजा इत्यर्थः सोपाधिकं प्रभावं भगवतो दर्शयित्वा त

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

निमित्तत्वेनोपादानत्वेन च यतो देवादीनां भगवानेव हेतुरतस्तद्विकारास्तेन तत्प्रभावं विदु
रित्यर्थः इतश्च कश्चिदेव भगवत्प्रभावं वेत्तीत्याह किं चेति को सौ प्रभावो भगवतो यं देवा न
विदुरित्यपेक्षायां पारमार्थिकप्रभावं तद्धीनं च फलं कथयति योमामिति यत्तु यथोपन्यस्तक
त्वमाह अनादित्वमित्यादिना भगवतो लोकमहेश्वरत्वे हेत्वन्तरमाह इतश्चेति मुमुक्षुभिराग
धातव्यसिद्धये वेद्यमोक्षसाधनेश्वरस्वरूपाद्यपृथग्भूतं त्वल्लक्षणं सोपाधिकं भगव

कस्मात्तेन विदुरित्यत्राह अहमादिः कारणं हि यस्माद्देवानां महर्षीणां च सर्वशः
सर्वप्रकारैः किं च यो मामजमनादिं च वेत्ति लोकमहेश्वरं असंमूढः स मर्त्येषु सर्वपा
पैः प्रमुच्यते ३ यो मामजमनादिं च यस्मादहमादिर्देवानां महर्षीणां च न मम अन्य आ
दिर्विद्यते अतोहमजोऽनादिश्च अनादित्वमजत्वे हेतुः तं मामजमनादिं च यो वेत्ति विजाना
ति लोकमहेश्वरं लोकानां महान्तमीश्वरं तुरीयमज्ञानतत्कार्यवर्जितं असंमूढः समो
हवर्जितः स मर्त्येषु मनुष्येषु सर्वपापैः सर्वैः पापैः मतिपूर्वामतिपूर्वकृतैः प्रमुच्यते
प्रमोक्ष्यते इतश्चाहं महेश्वरो लोकानां बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः सुखं
दुःखं भवोऽभावो भयं चाभयमेव च ४ बुद्धिरन्तःकरणस्य सूक्ष्माद्यर्थावबोधनसामर्थ्यं

प्रभावमभिधत्ते बुद्धिरिति सूक्ष्मादीत्यादिपदेन स्थूलमन्तःस्थूलमध्यार्थो गृह्यते उ
क्तं सामर्थ्यं बुद्धिरित्यस्मिन्नर्थे प्रसिद्धिं प्रमाणयति तद्वन्तमिति आत्मादीनि तत्त्वबोधव
न्तं हि ज्ञानिनेव दृष्टेति अन्तःकरणस्य प्रभुत्वमो विषयेभ्यो व्यावृत्तिर्विशेषः यथाशक्तीति पा
रोक्षुक्त्यावस्थामनतिक्रम्यार्थानां देशकालानुरूप्येण प्रतिपादनमित्यर्थः इन्द्रियाणां
बुद्धीन्द्रियाणां सान्निध्याप्रमोष्ठराग इन्द्रियाणीति जानीते भवतीति

मि

इत्येवमस्य सर्वात्मत्वेनैश्वर्यमुक्तमिति तेन सर्वेश्वरत्वेन सर्वज्ञत्वेन च महिमानं ज्ञात्वा मय्येव निष्ठावन्तो भवन्तीत्या-
ह इत्येवमिति समासं दर्शयता तात्पर्यमाह ज्ञानेनेतो भगवद्भजनेऽधिकारं दर्शयति अवगत्येति परमार्थ-
तत्त्वेनैवं यज्ज्ञानी मां ज्ञात्वा तेन मां द्रष्टुं बुद्धिमभिनिवेशं गतास्तामवतस्तेन संपूर्णं च भगवद्भजनेनुभवन्तीहे-
तुमित्याह भावेति न केवलमुक्तमेव भगवद्भजनं साधनं साधनान्तरं चास्तीत्याह किं चेति ई-
श्वरात्मनोश्च प्रागुक्तात्स्मृत्यविच्छिन्नप्रचाररहितं भगवद्भजनोपायमाह मच्चेति चक्षुरा-
दीनां भगवत्युपगतत्वे लक्ष्यगोचरत्वात्तत्प्राणार्थमाह मय्युपसंहृतेति भगवद्व्यतिरेके जीव-
नेयि नात्र त्वद्रूपि मय्येवार्पितं मद्गतानामित्याह अर्थितेति आचार्यमः श्रुत्वा वादकथया

मत एव स्थितिनाशक्रियाफलोपभोगलक्षणं विक्रियारूपं सर्वं जगत्प्रवर्तते इत्येवं म-
142 त्वा भजन्ते सेवन्ते मां बुधा अवगतपरमार्थतत्त्वाः भावसमन्विता भावो भावना परमार्थ-
तत्त्वाभिनिवेशः तेन समन्विताः संयुक्ता इत्यर्थः किं च मच्चित्ता मद्गतप्राणा बोधय-
न्तः परस्परं कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ९ मच्चित्ता मयि चित्तं येषां ते मच्चित्ताः
मद्गतप्राणाः मद्गताः प्राणाश्चक्षुरादयः प्राणा येषां ते मद्गतप्राणाः मय्युपसं-
हृतकरणा इत्यर्थः अथवा मद्गतप्राणा मद्गतजीवना इत्येतत् बोधयन्तः अवगम-
यन्तः परस्परमन्योन्यं कथयन्तश्च ज्ञानबलवीर्यादिधर्मैर्विशिष्टं मां तुष्यन्ति च परितो-
षमुपयान्ति रमन्ति च रतिं च प्राप्नुवन्ति प्रियसंगत्येव

परस्परं भगवत्तत्त्वमवाधिगमो बोधयन्तीति तदपि भगवद्भजनसाधनमित्याह बोधयन्त इति
आगमोपपत्तिभ्यां भगवन्तमेव विशिष्टधर्माणं शिष्येभ्यो गुरवो व्युत्पादयन्तीति तदपि भग-
वद्भजनमेवेत्याह कथयन्तश्चेति भक्तानां तुष्टिरती स्वरसतः स्यातामित्याह तुष्यन्तीति २४२
मनोरथपूर्त्यविरतिप्राप्तौ कामुकसंगमनमुदाहरणमाह प्रियेति यद्वा सौविवेकेपेने-
त्यादि तत्त्वदर्शिकानुक्तानिदानीमुदाहरति तेषामिति

बुद्ध्यादयः पदार्था अनेन विविधा भूतिर्भवनं वैभवं सर्वात्मत्वेनेत्याह । विस्तारमिति ईश्वरस्यानन्तर्य्य
सम्पादनसामर्थ्यं योगस्तदाह आत्मन इति योगस्तत्फलमैश्वर्य्यं सर्वज्ञत्वे सर्वेश्वरत्वे च प्रष्टोपदेश
ति ज्ञानलेशमात्रेणमन्वादयो ऽभूवन्नादयश्चेत्यज्ञानेनेत्यनेनाह भूयश्चेति यथा नोदिरे
ति योगैतथानिरूपणादेनेति वेदनस्यानिरूपणावदूणोऽयति यथावेदितसोपाधिकज्ञाने
निरुपाधिके ज्ञाने द्वारमित्याह सोविकंपेनेति उक्तेऽर्थे श्रुतेर्व्यभिचाराभावमाह नात्रेति कथं
तावक विस्तरेणैश्वर्य्यं ज्ञानमुक्तं योगस्याहेतोरिति मन्वानः पृच्छति कीदृशेनेति उक्तं ज्ञान

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा मद्भावा मानसा जाता येषां लोक इमाः प्रजाः
६ महर्षयः सप्त भृग्वादयः पूर्वेऽतीतकालसंबंधिनः चत्वारो मनवस्तथा
सावर्णिरित्युक्ताः प्रसिद्धा अत्र च मद्भावाः मद्गतभावना वैष्णवा मत्सामर्थ्येनोपेताः
मानसा मनसैव संकल्पेनोत्पादिताः मया जाताः उत्पन्नाः येषां मन्वादीनां महर्षीणां च सृष्टि
लोक इमाः स्थावरजंगमाः प्रजाः एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः सोऽवि
कंपेन योगेन युज्यते नात्र संशयः ७ एतां यथोक्तां विभूतिं विस्तारं योगं च पूर्वो
क्तं येन योगेन युज्यते नात्र संशयः ७ एतां यथोक्तां विभूतिं विस्तारं योगं च युक्ति
वात्मनो गतेन अथवा योगेश्वर्यं सामर्थ्यं सर्वज्ञत्वं योगजं योग उच्यते मम मदीय
योवेत्ति तत्त्वतः तेन न यथावद्वित्यनेन सोऽविकंपेनाप्रचलितेन योगेन सम्यग्दर्श
नस्थैर्यलक्षणेन युज्यते संबध्यते नात्र संशयः नास्मिन्नर्थे संशयोऽस्ति कीदृशेनाविक
युज्यते कंपेन योगेन युज्यत इत्युच्यते अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इति मत्वा भजन्ते मां बु
धा भावसमन्विताः ८ अहं वासुदेवाख्यं परं ब्रह्म सर्वस्य जगतः प्रभव उत्प
मात्मत्वान्नाभेदोपपत्तेराह इत्यत इति प्रभवत्वस्माद्भावप्रभवः सर्वं
प्रकृतिः सर्वात्मा स्माहात्म्येनैवेति सर्वज्ञत्वं सर्वेश्वरात्मेत्यनेनान्योगेऽयोति नात्रैदिम
वेति मयाचातयैमित्त्येपेमात्मसर्वपथावमर्यादामनतिक्रम्य सर्वं प्रवर्ततेत्याह मत्वेति

तस्माद्व्यापकस्य त्रिष्टोहूनि विशेषो वा कोत्स्य बुद्धियुक्तं भिध्यते: विद्यात्मा सहायस्सा मत्त्यांदत्ताना
दिनियोगेहेत्वित्यर्थ: बुद्धीन्द्रियोद्भवस्यातत्त्वानादिनिवर्तकत्वमुक्तं बाधहेतुत्वेसत्त्विवर्तकत्वमिति
फलांतरमाह ज्ञानेति देहादिष्वनात्मना नात्मवर्गोतिति प्रीतेवस्त्वगोचरत्वमाह विवेकजत्वेन भगव
ति सद्भाविहितया भक्त्या तत्सप्रसादोनुग्रह: एवंतस्तहस्तेनामेवनद्वारालस्यानन्तिमाह भक्तो
ति मय्येवभावनायामभिनिवेशवातस्तेनेत्रेतिनोपेजायते नहिवानतेरणमतत्रेणद्वोदोपस्या
त्वादित्याह मद्भावेनेति ब्रह्मचर्यमसंगमादित्याद्वेनयमादिग्रहस्तेनहेतनाहितसंस्कारव
शंतोयावज्ज्ञानदृष्ट्याविषयवर्जितनिष्ठयापनहिवर्तिनिरेकेणदीपानिवर्त्तनेतदाह ब्रह्मचर्येति
नचाध्यात्मदृनेदीपस्योत्पत्तिरहत्वादित्याह विरक्तेति योहिपयोम्योव्याप्रत्ते चित्ते रागाद्यकल

143

आत्मभावस्थ आत्मनो भावोऽन्तःकरणाशयस्तस्मिन्नेव स्थित: सन् ज्ञानदीपेन वि
वेकप्रत्ययरूपेण भक्तिप्रसादस्नेहाभिषिक्तेन मद्भावनाभिनिवेशवातेरितेन ब्रह्मच
र्यादिसाधनसंस्कारवत्प्रज्ञावर्तिना विरक्तान्तःकरणाधारेण विषयव्यावृत्तरागा
द्वेषाकलुषितचित्तनिवातापवरकस्थेन नित्यप्रवृत्तैकाग्र्यध्यानजनितेन सम्यग्द
र्शनभास्वता ज्ञानदीपेनेत्यर्थ:

षितेत्तदेवनिवातमपवरकं तत्स्थितत्वमस्यदर्शयति विषयेति भास्वतेति विशेषणविवक्षा
यति नित्येति सदाननंतविनैकाग्र्यं तद्रूपं यद्ध्यानं तेनजनितं सम्यग्दर्शनं फलं तदेवभास्वत्त्वं तो
तात्पर्यं तेनेत्यर्थ: तेनाज्ञानेनमकार्येनिवृत्ते भगवद्भाव: स्वयमेवप्रकाशते भवतीति मत्वा व्याख्यात
मेवपदमनुवदति ज्ञानेति निरस्ताशेषविशेषणं निरुपाधिकं सोपाधिकं वा सर्वात्मत्वादि भग १४३
वतोरूपं तद्दीपफलं वस्तु तावन्निरुपाधिकरूपस्य ग्राहकं तदुद्भूतनवग्राह्यतेति एवं केमदानुग्र
हार्थं सर्वदा सर्वं बुद्धिग्राह्यं सोपाधिकं रूपं विस्तरेण श्रोतुमिच्छन्नर्जुनोस्माह [illegible] यथानि
मिति

नित्याभियुक्तानामनवरतंभगवत्येकाग्रमनसांनामित्यर्थः । अत्रादिलोकत्रयहेतवर्थिंतेनवागर्भवा
सार्थंतेनवाप्रत्यहंजीवनोपायार्थमेवाभजंतेमित्याशंकितानूपयाति किमित्याह ना नित्ययुक्ता
ज्ञानाद्योमंत्रिस्तेहेनकर्मनामित्यर्थः । तेभ्योहंतत्त्वज्ञानंप्रयच्छामीत्याह ददामीति । तंबुद्धिसं
वंधस्यफलमाह येनेति ध्यानजन्यप्रकर्षकाष्ठांगतांतःकरणपरिणामोनस्तस्माद्विशेष
गवद्रूपसाक्षात्कारहेतोबुद्धियोगेप्रसक्तेएवंकंभक्तानधिकारीत्याशंकापरिहरति केनेति भगवत्साक्षात्बुद्धि
साध्यतेसत्यनित्यतापन्नेस्वमनसोबुद्धियोगंददामीत्यन्वयमितिशंकेत किमर्थमिति ते

येयथोक्तप्रकारैर्भजंतेमांभक्ताःसंतःप्रीतिपूर्वकं । तेषांसततयुक्तानांभजतांप्रीतिपू
र्वकं । ददामिबुद्धियोगंतंयेनमामुपयांतिते १० तेषांसततयुक्तानांनित्याभियुक्तानांभजं
तांसेवमानानां किमर्थित्वादिनाकारणेनेत्याह प्रीतिपूर्वकं प्रीतिःस्नेहःपूर्वंयत्र
वंकं मांभजतामित्यर्थः । ददामिप्रयच्छामितंबुद्धियोगंबुद्धिःसम्यग्दर्शनंमत्तत्त्वविषयंते
नयोगोबुद्धियोगःतंबुद्धियोगंयेनबुद्धियोगेनसम्यग्दर्शनलक्षणेनमांपरमेश्वरमा
त्मभूतमात्मत्वेनोपयांतिप्रतिपद्यंते केतेयेमच्चित्तत्वादिप्रकारैःमांभजंते किमर्थंक
स्यचत्वस्यप्रतिबंधहेतोर्नाशकंबुद्धियोगंतेभ्योहंददामीत्याकांक्षायामा
ह तेषामेवानुकंपार्थमहमज्ञानजंतमः । नाशयाम्यात्मभावस्थोज्ञानदीपेनभास्वता
११ तेषामेवकथंतुनाममयिश्रेयःस्यादित्यनुकंपार्थंदयाहेतोरहमज्ञानजंमि विवेकतोजा

तंबुद्धियोगंकिमर्थंददामीतिसंबंधः भगवत्प्राप्तिप्रतिबंधकज्ञानंकोबुद्धियोगस्तेननास्ति
तत्प्राप्तिप्रतिबंधनिवर्तकमित्याशंकयाह कथंचेति भक्तानांतत्प्राप्तिप्रतिबंधकोविविचारदर्शनप्रतिबंध
कांतायामाहेति अविवेकोनाशज्ञानेननाशातमित्यज्ञानेनतदभयमेकोप्रकृत्यनुमाविवादिते
नचनत्राणकतेजस्यकराचिन्तेनमेतमप्यनुक्तेनेनाहनाशयामीत्युक्तेकेवलंचेतन्यस्यजडे
बुद्धिवृत्तिविवाक्षानापनाशकतेमाशंकानिविशिनष्टि आत्मेति

154

स्वयमेवोपदेशमन्तरेणेत्यर्थः। आत्मना स्वप्रकाशेनाविषयतयेति यावत्। आत्मानं निरुपाधिकं रूपं न च तव सोपाधिकमपि रूपमन्यस्य गोचर इति सूचितुमाह निरतिशयेति पुरुषश्चासावुत्तमश्चेति तत्सं बुद्धानीतत्कार्यं चैतन्यरूपत्वं सर्वोपाधीनां बाधावधित्वे सर्वज्ञत्वादिमत्त्वं सर्वकारणत्वे च कथयति भूतानीति सर्वेश्वरत्वमाह भूतानामीशनशीलेति। उक्ते निरुपाधिके रूपे देवादीनामाराध्यत्वमधिगच्छतीत्याह देवदेवेति जगतः सर्वस्य स्वामित्वेन पालयितृत्वमाह जगदिति यस्मात्त्वमन्येषामगोचरस्त स्मात्त्वज्जानासि न शृणुतस्माद्विवेकरूपेण वक्तुमित्याह वक्तुमिति दिव्या असाधारणास्तत्त्वमन्वय मन्वाचष्टे आत्मन इति वक्तव्या विभूतीर्विशिनष्टि याभिरिति यद्वा लोकान्पूरयितात्वं

ऋषिभिः त्वया च न हृतं सत्यमेव मन्ये यन्मां प्रति वदसि भाषसे केशव न हि ते भगवन्
व्यक्तिं प्रभवं विदुर्देवा न दानवाः। यतस्त्वं देवादीनामादिरतः स्वयमेवात्मनात्मा-
नं वेत्थ त्वं पुरुषोत्तम। भूतभावन भूतेश देवदेव जगत्पते॥ १५॥ स्वयमेवात्मनात्मानं
वेत्थ त्वं निरतिशयज्ञानैश्वर्यबलादिशक्तिमन्तमीश्वरं पुरुषोत्तम भूतानि भावयतीति
भूतभावनः हे भूतभावन भूतेश भूतानामीशिता हे देवदेव जगत्पते। वक्तुमर्हस्यशेषेण
दिव्या ह्यात्मविभूतयः। याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि॥ १६॥ वक्तुं वर्ण-
यितुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः। आत्मनो विभूतयो यास्ता वक्तुमर्हसि याभि-
र्विभूतिभिरात्मनो माहात्म्यविस्तरैः इमांल्लोकांस्त्वं व्याप्य तिष्ठसि। कथं विद्यामहं योगिं-
स्त्वां सदा परिचिन्तयन्। केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया॥ १७॥ कथं विद्यां विजानीयां

त्वं सदा विभूतिरूपेण चिन्तयन् महेश्वरोऽस्मीत्यर्थः किं सर्वो विभूतिः आनन्दमयो योगाभ्यासात् स्वरूपकारकत्वेन फलं कथयति कथमिति योगो नामैश्वर्यं तदस्यास्तीति योगी हे योगिन्नहं ध्यायन्निति त्वां केन प्रकारेण सततं समनुसंदधानो विशुद्धबुद्धिर्भूत्वा निरुपाधिकं त्वां विजानीयां

परं ब्रह्म भवानिति लक्षणनिर्देशात्स्वलक्षणं परं धामेत्यादिविशेषणत्रयं धाम प्रकाशः स्वप्रकाशानवा-
च्छिन्नज्ञानं यस्याचेष्टं तेजस्वीति तस्य चैतन्यस्य परतेजस्त्वादित्याहितेनैकोऽटस्याश्रमः स्वपावनमम-
न पुरुषं तत्र चाने यद्देवलक्षणं परं ब्रह्म तद्भवानेव नान्य इत्यर्थः ज्ञानं त्वमेवमज्ञातो सौ इत्याशंक्या-
ह वाक्यादित्याह पुरुषमिति दिविपरमभवानिमवर्तीति दिव्यस्त्वं सर्वश्रेष्ठचानीति दीव्यतीति यो
नत इति देवः सर्वादिसर्वमूलत्वादेवं वाजस्त्वं सर्वगतमाहुरिति संबंधः उक्तविशेषणत्वास्थ
यः सर्वेषु स्मादाह तस्मान्नेऽवचनान्नेवोक्तेऽवमेवपृन्नमित्याह इदेशामिति ऋषिग्रहणेन गृहीता
नां नामपि नारदादीनां विशिष्टत्वात्पृथग्ग्रहणं असितो देवलस्यापि ताकिमन्यैस्त्वं स्वयमेवात्मा

यथोक्तं भगवतो विभूतियोगं श्रुत्वा अर्जुन उवाच परं ब्रह्म परं धाम पवित्रं परमं भवा-
न् पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुं १२ परं ब्रह्म मूलं निरंजनं परं धाम परं तेजः प-
वित्रं पावनं परमं श्रेष्ठं भवान् पुरुषं पूर्णं शाश्वतं नित्यं दिव्यं दिविभवं आदिदेवं सर्वदेवाना-
मादिदेवमजं विभुं विभवनशीलं ईदृशं आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा अ-
सितो देवलो व्यासः स्वयं चैव ब्रवीषि मे १३ आहुः कथयंति त्वां ऋषयो वसिष्ठादयः स-
र्वे देवर्षिर्नारदस्तथा असितो देवलो व्यासमेवाह व्यासश्च स्वयं चैव त्वं चापि ब्रवीषि मे
सर्वमेतदृतं मन्ये यन्मां वदसि केशव नहि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः १४

श्री भ गी टी प्र

न मुक्तः स्वरूपमतस्तूक्तं यानीत्याह स्वयं चेति ऋषिभिस्त्वया चोक्तं तदुक्तं सर्वं सत्यमेवेति मम मनी-
षेत्याह सर्वमिति किं तदित्यपेक्षायाम् स्वरूपमित्याह यन्मामिति देवादिभिः सर्वैरज्ञा-
मानं तथापि तद्रूपे विशिष्टे वक्तुं ग्रहणमनर्थकमित्याशंक्याह नहीति प्रभवो नाम प्रभावो नि-
रुपाधिकस्वभावः यद्वा देवादीनामपि दुर्विज्ञेयं तव स्वरूपं तदा का कथा मनुष्याणामित्यर्थः
कश्चिद्देवमहत्ताके प्रनानेकजन्मसंसिद्धो जानाति तदेतद्गृहीतस्त्वस्वरूपमित्याशंक्येत्याह यत इति

तत्रहेतुर्यतश्चेति विभूतिश्रुतौ तृप्तिर्नैवास्तु नेत्यमानादावेवपारमार्थिकं पारमैश्वर्यं रूपं ध्यातो नैवजनकस्य
मनःसमाधानं सम्पद्यत इति तत्रेति सोपाधिकमपि कल्याणकं परमैश्वर्यं पश्यतः तन्मात्रणस्थो नैव
समाधानकृते चास्ये वेत्याह तावदिति प्राधान्येनास्मि न तु विशेषक मे ज्ञेरस्याप्ययोहं रूपं
सर्वेषां भूतानामहं रूपमतः स्थितिः परः आत्मगात्मा सोहमेवेतिवाक्यार्थमाह सर्वेषामिति सम्य
मेतेषां मध्ये मां वा परमात्मानं मामात्मत्वेन ध्यानेनानुगन्तव्येत्याह तदशक्तौ तेति वक्ष्यमाणादि
ष्वादिषु परस्पनध्येयतस्मस्य देवकारणाकिं चिन्तनं तत्त्वध्यायमप्यवास्याह यस्मादिति
यस्मादेव तत्त्ववर्षणेनापि न शक्यतेवक्तुं यतो नान्तं यतो विस्तरस्य मे मम विभूतीनामिति
न्यथः तत्र प्रथममेव तावत्प्रधानं अहमात्मा गुडाकेश सर्वभूताशयस्थितः अ
हमादिश्च मध्यं च भूतानामन्त एव च २० अहमात्मा प्रत्यगात्मा गुडाकेश गुडाका
निद्रा तस्या ईशो गुडाकेशो जितनिद्र इत्यर्थः घनकेश इति वा सर्वेषां भूतानामा
शयेऽन्तर्हृदि स्थितः अहमात्मा प्रत्यगात्मा नित्यं ध्येयः तदशक्तेन तु भा
वेषु चिन्त्याह चिन्तयितुं शक्यः यस्मादहमेव भूतानामादिः कारणं तथा मध्यं च स्थि
तिः अन्तः प्रलयः एवं च ध्येयोऽहं आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् म
रीचिर्मरुतामस्मि नक्षत्राणामहं शशी २१ आदित्यानामहं द्वादशानां विष्णुर्नामादि
त्यः ज्योतिषां रविरंशुमान् प्रकाशयितॄणां रश्मिमान् मरीचिर्नाम
सर्वकारणत्वेन सर्वज्ञत्वेन सर्वशक्तिमत्त्वेन परमध्येयत्वमुक्त्वा कारणस्यादित्या
द्युपाधेयत्वेन सर्वोपाधिनाशत्वं विभूतिपाठस्य एवं चेति तत्र तत्र प्रधानत्वे
नेदंरस्य ध्येयत्वमेव श्रेयस्कारीमेवदर्शयति आदित्यानामिति दशानां मरुद्गणानां
दीनां मध्येऽस्मामवेदी सोऽभिधानानां वेदानामिति

२४५

चेतनाचेतनभेदात्पृथिव्यादिवस्तुनावस्तुवचनेनोक्तं तेषुसमूहमुपसंहरति विस्तरेणेति अर्दतेर्गति
कर्मणोरूपंजनार्दनेतिरूपेणतत्त्वाध्यायाद्युपाति असुराणामिति प्रकारांतरेणाप्यर्थमाह
याति अभ्युदयेति ननुपूर्वमेवसमग्रमेतद्भवतोक्तं विभूतिरैश्वर्यंचस्पष्टंकिंनु तत्किमितिपुनः
नाभिधानेनेत्याह भूयइति अमृतमिवामृतंसुखमित्यर्थः एवंपृष्टोविस्तरमपिभगवानुक्तवा

केषुकेषुचभावेषुवस्तुषुचिंत्योसिध्येयोसिभगवन्मया विस्तरेणात्मनोयोगंवि
भूतिंचजनार्दन भूयःकथयतृप्तिर्हिशृण्वतोनास्तिमेमृतं १८ विस्तरेणात्मनो
योगंयोगैश्वर्यंशक्तिविशेषंविभूतिंचविस्तारंध्येयपदार्थानांहेजनार्दन अर्दते
र्गतिकर्मणोरूपं असुराणांदेवप्रतिपक्षभूतानांजनानांनरकादिगमयितारं
जनार्दन अभ्युदयनिःश्रेयसपुरुषार्थप्रयोजनंसर्वैर्जनैर्याच्यतइतिवाजनार्द
न भूयःपूर्वमुक्तमपिकथयतृप्तिर्हिपरितोषोहियस्मान्नास्तिमेममशृण्वतस्त्व
न्मुखनिःसृतवाक्यामृतं श्रीभगवानुवाच हन्ततेकथयिष्यामिदिव्याह्या
त्मविभूतयः प्राधान्यतःकुरुश्रेष्ठनास्त्यन्तोविस्तरस्यमे १९ हन्तेदानींतेतवदि
व्याहिविभवा आत्मविभूतयः आत्मनोममविभूतयोयास्ताःकथयिष्यामि
प्राधान्यतः यत्रयत्रप्रधानायायाविभूतिस्तांतांप्रधानांप्राधान्येनकथ
यिष्यामि [illegible]ःश्रेष्ठ हेकुरुश्रेष्ठकुरुनन्दन

नित्याह भगवानिति हन्तेत्यनुमतिवाचकं जिज्ञासावत्त्वेकालेदर्शयति इदानीमि
ति दिव्यभवत्वमशक्तेनेतेमसमदर्शाचरणेवाक्याद्वयं याति यास्ताइति सर्वविभूतीः

शिखरवतामुच्छ्रितानां पर्वतानां मध्ये मेरुरहं इत्युक्ते पि स्थितिशीलानां तेषामेव हिमवा

यज्ञानां जपयज्ञोऽस्मि स्थावराणां स्थितिमतां हिमालयः ॥ अश्वत्थः सर्ववृक्षा
णां देवर्षीणां च नारदः । गंधर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥ २६ ॥ अ
श्वत्थः पिप्पलः सर्ववृक्षाणां देवर्षीणां च नारदः । देवा एव संतः ऋषित्वं प्राप्ता
मंत्रदर्शित्वात् देवर्षयः तेषां नारदोऽस्मि गंधर्वाणां चित्ररथो नाम गंधर्वोऽहं
सिद्धानां जन्मनैव धर्मज्ञानवैराग्यैश्वर्यातिशयं प्राप्तानां कपिलो नाम मुनि
रहं ॥ उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवं ऐरावतं गजेंद्राणां नराणां च न
राधिपं ॥ २७ ॥ उच्चैःश्रवसमश्वानां उच्चैःश्रवा नामाश्वस्तं मां विद्धि जानीहि अमृ
तोद्भवं अमृतनिमित्तमथनोद्भवं ऐरावतं इरावत्या अपत्यं गजेंद्राणां हस्तीश्वरा
णां तं मां विद्धि इत्यनुवर्तते नराणां मनुष्याणां नराधिपं राजानं मां विद्धि
आयुधानामहं वज्रं धेनूनामस्मि कामधुक् प्रजनश्चास्मि कंदर्पः सर्पाणा
मस्मि वासुकिः ॥ २८ ॥ आयुधानामहं वज्रं दधीचेरस्थिसंभवं धेनूनां दोग्ध्री
नामस्मि कामधुक् वसिष्ठस्य सर्वकामानां दोग्ध्री सामान्या वा कामधुक् ॥

नु पर्वतराजोऽस्मीत्यर्थः मेरुर्देवगृहीतत्वाह स्थितीति सर्ववृक्षाणामित्र सर्वशाखिनवनस्पतयः २४६
पिंगटस्तेन प्रजनयतीति व्युत्पत्तिमाश्रित्याह प्रजनयतेति

146

संघाते जीवाधिष्ठिते या अवस्था चलने सर्वत्र व्यापिनी चेतनाभिव्यंजिके निशेषः पुरोहितेषु बृ

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः । इंद्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ २२ ॥ वेदानां मध्ये सामवेदोऽस्मि देवानां रुद्रादित्यादीनां वासव इंद्रोऽस्मि इंद्रियाणामेकादशानां मनश्चास्मि भूतानामस्मि चेतना । कार्यकारणसंघाते नित्याभिव्यक्ता बुद्धिवृत्तिश्चेतना । रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसां । वसूनां पावकश्चास्मि मेरुः शिखरिणामहं ॥ २३ ॥ रुद्राणामेकादशानां शंकरश्चास्मि वित्तेशः कुबेरो यक्षरक्षसां यक्षाणां राक्षसानां च वसूनामष्टानां पावकोऽग्निरस्मि मेरुः शिखरिणां शिखरवतामहं पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिं सेनानीनामहं स्कंदः सरसामस्मि सागरः ॥ २४ ॥ पुरोधसां च राजपुरोहितानां मुख्यं प्रधानं मां विद्धि जानीहि पार्थ बृहस्पतिं स हि इंद्रस्येति मुख्यः स्यात् पुरोधाः सेनानीनां सेनापतीनामहं स्कंदः देवसेनापतिः सरसां यानि देवखातानि सरांसि तेषां सरसां सागरोऽस्मि भवामि । महर्षीणां भृगुरहं गिरामस्म्येकमक्षरं यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥ २५ ॥ महर्षीणां भृगुरहं गिरां वाचां पदलक्षणानामेकमक्षरमोंकारोऽस्मि

हस्पतेर्मुख्यत्वे हेतुमाह स हीति एकमित्योंकारस्य ब्रह्मप्रतीकत्वेन तदभिधानत्वेन च प्रधानत्वमुच्यते जपयज्ञस्य यज्ञान्तरेभ्यो हिंसादिराहित्येन वैशिष्ट्यमन्यद्रूपेण्याह यज्ञा

गी॰ भा॰ टी॰ १५०

सर्वहरश्चाहमृत्युरित्यमर्थान्तरमाह उद्भवेति भाविकल्याणानामित्युक्तमेव स्पष्टयति उत्क
र्षेति कीर्तिर्धार्मिकत्वनिमित्ता ख्यातिः श्रीर्लक्ष्मीः कान्तिः शोभा वा वाग्वाणी सर्वस्य प्रका
शिका स्मृतिश्चिरानुभूतस्मरणशक्तिः मेधा ग्रन्थधारणशक्तिः धृतिः धैर्यं क्षमा मानाव
मानयोरविकृतचित्तता स्त्रीरूपाः कीर्त्यादीनामुत्तममुपपादयति सामानीति वेदाना
सामवेदोऽस्मीत्युक्तं तत्रावान्तरविशेषमाह बृहत्सामेति छन्दसां मध्ये गायत्रीनामकः छ

प्रवदतां प्रधानेयतः सोऽहमस्मि प्रवदतां वक्तृद्वारेण वदनभेदानामेवेह वादजल्पवितण्डानां
ग्रहणं प्रवदतामिति अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च अहमेवाक्षयः का
लो धाताहं विश्वतोमुखः ३३ अक्षराणां वर्णानामकारोऽस्मि द्वन्द्वः सामासोऽस्मि सामा
सिकस्य च समाससमूहस्य किंच अहमेवाक्षयोऽक्षीणः कालः प्रसिद्धः क्षणाद्यः परमो वा
श्वरः कालस्यापि कालोऽस्मि धाताहं कर्मफलस्य विधाता सर्वस्य जगतो विश्वतोमुखः
सर्वतोमुखः मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यतां कीर्तिः श्रीर्वाक्च नारीणां स्मृ
तिर्मेधा धृतिः क्षमा मृत्युः द्विविधो धनादिहरः प्राणहरश्च तत्र यः प्राणहरः स सर्वहरः उ
च्यते सोऽहमित्यर्थः अथवा परः ईश्वरः प्रलये सर्वहरणात्सर्वहरः सोऽहं उद्भवः उत्कर्षोऽभ्यु
दयः तत्प्राप्तिहेतुश्चाहं केषां भविष्यतां भाविकल्याणानामुत्कर्षप्राप्तियोग्यानामित्यर्थः
कीर्तिः श्रीर्वाक् नारीणां स्मृतिर्मेधा धृतिः क्षमा इत्येता उत्तमाः स्त्रीणामहमस्मि यासामा
भासमात्रसम्बन्धेनापि लोकः कृतार्थमात्मानं मन्यते बृहत्साम तथा साम्नां गायत्री छन्दसा
महं मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ३५ बृहत्साम तथा साम्नां मध्ये श्रेष्ठतया

न्दोऽहमित्युक्तं छन्दसामृग्भ्योऽतिरेकेण ऋग्रूपाभावादित्याशंक्याह गायत्र्यादीति द्विजा
तीनां द्वितीयजन्मजननीत्वादित्यर्थः मार्गशीर्षो मृगशीर्षेण युक्ता पौर्णमासी यस्मिन्निति
मार्गशीर्षो मासः सोऽहं पक्वसस्याढ्यत्वादित्याह मासानामिति

१५०

नो

सर्पाणां नागानां च जातिभेदादिति द्रष्टव्यं अहमादिश्चेत्यादावुक्तमेव पुनर्विशेषेणोच्यते तथा च पुनरु-
क्तिरित्याशंक्याह भूतानामिति सर्गेशब्देन सृज्यन्त इति सर्गाणां कार्याणामित्युच्यते प्र-
जनः प्रजननकारणं पिता चास्मि कन्दर्पः कामः सर्पाणां सर्पभेदानामस्मि वासुकिः
सर्पराजः २८ अनन्तश्चास्मि नागानां वरुणो यादसामहम् पितॄणामर्यमा चास्मि यमः
संयमतामहम् २९ अनन्तो नाम चास्मि नागानां नागभेदानां नागराजः वरुणो
यादसामहं [जलदेवतानां] राजाहं पितॄणामर्यमा नाम पितृराजश्चास्मि यमः संयम-
तां संयमनं कुर्वतामहं प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् मृगाणां च मृ-
गेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ३० प्रह्लादो नाम चास्मि दैत्यानां दितिवंश्यानां कालः
कलयतां कलनं गणनं कुर्वतामहं मृगाणां मृगेन्द्रः सिंहो व्याघ्रश्चाहं वैनतेय-
श्च पक्षिणां गरुत्मान् विनतासुतोऽहं पक्षिणां पतत्रिणां पवनः पवतामस्मि रामः
शस्त्रभृतामहम् झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ३१ पवनो वायुः
पवतां पावयितॄणामस्मि रामः शस्त्रभृतामहं शस्त्राणां धारयितॄणां दाशरथी
रामोऽहं झषाणां मत्स्यादीनां मकरो नाम जातिविशेषोऽस्मि स्रोतसां स्रवन्तीनाम-
स्मि जाह्नवी गंगा सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन अध्यात्मविद्या विद्यानां
वादः प्रवदतामहम् ३२ सर्गाणां सृष्टीनामादिरन्तश्च मध्यं चैवाहं उत्पत्तिस्थिति-
प्रलया अहमर्जुन भूतानां जीवाधिष्ठितानामेवादिरन्तश्चेत्यादिरुक्तः उपक्रमे इह तु
सर्वस्यैव सर्गमात्रस्येति विशेषः अध्यात्मविद्या विद्यानां मोक्षहेतुत्वात्प्रधानाहं
ध्यात्मविद्यात्मतत्त्वं करणपरिणतिरविद्यानिवर्तकाहं प्रवदतां सर्वेषां वादो वीतरा-
गकथा तत्त्वनिर्णयावसाना यतः प्रवदतामिति लक्षणया कथाभेदापादानत्वान्निर्धारणषष्ठी

गी· भा·
टी·
१४८

